BOOK OF EXERCISES

A COMPANION TO THE SANSKRIT MANUAL FOR HIGH SCHOOLS

Part I

BY

R. ANTOINE, S.J., M.A.

ST. XAVIER'S COLLEGE
30 PARK STREET
CALCUTTA 16



1953

CATHOLIC PRESS

RANCHI

LESSON 1

Write the Sanskrit vowels. 1

Write the Sanskrit consonants. 2

What are the hard consonants? 3

What are the soft consonants? 4

Join the following groups of letters: 5

न् + अ ; प् + आ; ज् + इ ; द् + ई ; श् + उ ; भ् + ऊ ;
स् + ऋ ; त् + ॠ; क् + ऌ; य् + अ ; व् + आ; ङ् + इ ;
ष् + ई ; र् + उ ; र् + ऊ; म् + ऋ; ग् + ए ; घ् + ओ;
द् + औ; थ् + ऐ ; च् + इ ; ह् + आ; श् + ई ; ट् + ए ।

Write the following in Sanskrit letters: 6

bhūmāvupaviśāmi; snāyuḥ; jñānam; kṣetrāṇi; aṅgāt; udyāne; rohanti; arthābhyām; śāstraiḥ; sarvadā; krīṇīvaḥ; dṛśyate; asti; andhakāreṇa; ratna; atra; tyakta; mūḍa; tiṣṭhāmi; bhramati; aśva; baddha; sa na jānāti; tena suhṛdā rakṣitaḥ; mayā dattam; tvayā dṛṣṭam; juṣmābhiruktam.

LESSON 2

Vocabulary 1

कृष् (कर्षति)	to draw	पत् (पतति)	to fall
खन् (खनति)	to dig	बुध् (बोधति)	to know
खाद् (खादति)	to eat	भू (भवति)	to be, to become
चर् (चरति)	to move	यज् (यजति)	to worship
चल् (चलति)	to move	रक्ष् (रक्षति)	to protect
जि (जयति)	to conquer	रुह् (रोहति)	to grow

जीव् (जीवति) to live
त्यज् (त्यजति) to abandon
दह् (दहति) to burn
द्रु (द्रवति) to run, to melt
धाव् (धावति) to run
नम् (नमति) to salute
नी (नयति) to lead
पच् (पचति) to cook
वद् (वदति) to speak
वप् (वपति) to sow
वस् (वसति) to dwell
वह् (वहति) to carry
व्रज् (व्रजति) to go
शंस् (शंसति) to praise
सृ (सरति) to go
स्मृ (स्मरति) to remember

2 Conjugate the following in the present tense, active voice:

नी, वस्, द्रु, बुध् and स्मृ

3 Translate the following into English:

सरामि । त्यजन्ति । जीवामः । शंसतः । पचसि । रक्षथ । खादावः । वदति । रोहथः । कर्षन्ति । खनामि । चरामः । जयतः । जीवसि । दहामः । नमति । नयथ । स्मरावः । वसामि । चलन्ति । धावतः । पचन्ति । बोधति । वपथ । भवसि । यजतः । वहामः । व्रजावः । सरामि ।

4 Translate the following into Sanskrit:

We worship. You two move. He conquers. They grow. I sow. We two abandon. Thou salutest. They two remember. They cook. I fall. He draws. You two dig. They know. We two become. Thou eatest. They two move. We protect. You live. He leads. We go. You two praise. They melt. I burn. Thou dwellest. They two speak. We two run. You go. He carries. I cook. You two eat.

LESSON 3

Vocabulary

Masculine nouns	*Neuter nouns*	*Prepositions governing the accusative*
अश्वः horse	अन्नम् food	अभितः near, in front
आचारः conduct	इन्धनम् fuel	परितः around
कपोतः pigeon	कनकम् gold	सर्वतः on all sides
करः hand	कमलम् lotus	उभयतः on both sides
काकः crow	जलम् water	धिक् fie on
ग्रामः village	तृणम् grass	समया } near
जनः person	दुःखम् misery	निकषा } near
दासः servant	पत्रम् leaf	विना } without
देशः country	पात्रम् vessel	अन्तरेण } without
नरः man	फलम् fruit	अनु after, according to, along
नृपः king	शरीरम् body	प्रति towards
पर्वतः mountain	शास्त्रम् sacred precept	अन्तरा between
बालः boy	शीलम् character	
मेघः cloud	सुखम् happiness	
वृक्षः tree	स्थानम् place	

Translate the following into English:

काकः फलानि खादति। जलम् द्रवति। दुःखम् स्मरतः। अश्वाः पर्वतम् प्रति धावन्ति। नृपः आचारम् शंसति। जनाः जीवन्ति। देशम् त्यजावः। ग्रामम् सर्वतः वृक्षाः रोहन्ति। कूपम् निकषा दासौ वदतः। कनकं विना शरीरम् जीवति। शीलम् बोधामि। सुखम् दुःखम् जयति। नरः इन्धनम् वहति। कपोतः करम् त्यजति। पर्वतम् परितः कमलानि रोहन्ति। जनः अन्नम् पचति। अश्वाः तृणम् खादन्ति। पात्रे अन्तरा कपोतः पत्रम् त्यजति। मेघाः सरन्ति। धिक् बालम्। अन्नम् अन्तरेण कमलम् रोहति। नरः तृणम् वपति। पर्वतम् उभयतः नृपः वृक्षान् दहति। अनु नृपम् दासः व्रजति। अनु शास्त्रम् बालौ नृपम् नमतः। स्थानम् अभितः दासः फलानि पचति। वनम् समया वसामः।

3 Decline fully the following nouns:

ग्रामः, मेघः, कपोतः, कमलम्, शरीरम् ।

4 Join the **sandhis** in the following:

नृपः जयति । बालाः धावन्ति । तृणम् खादति । नरः त्यजति । जनाः चलन्ति । बालः जनम् स्मरति । अश्वः अन्नम् खादति । ग्रामम् अभितः वृक्षाः रोहन्ति ।

5 Translate the following into Sanskrit:

Example : Two servants lead the horses around the village.

Two servants	noun-**dual-masc.**-subject-**nomin.** : दासौ
lead	verb-**pres.-act.-3rd pers.-dual** : नयतः
the horses	noun-**plur.-masc.**-object-**accus.** : अश्वान्
around	preposition: परितः
the village	noun-**sing.-masc.**-governed by परितः-**accus.** : ग्रामम्

ग्रामम् परितः दासौ अश्वान् नयतः ।

Sandhi: ग्रामं परितो दासौ अश्वान् नयतः ।

Trees grow near the well. The pigeon becomes a crow. The king conquers the country. Two horses eat grass. The servant draws the boys. Persons carry the vessels. We live without happiness. Trees carry leaves. On both sides of the well boys burn the fuel. Clouds move towards the mountain. The hand protects the body. Water falls on all sides of the village. Sacred precepts lead men to happiness. Fie on the crows! Between the two trees the water flows. Persons salute the king. I praise the lotus. According to (his) character, the king protects the people (persons). You two leave the place.

LESSON 4

Vocabulary

अस् (अस्यति) to throw	दिव् (दीव्यति) to play	गम् (गच्छति) to go
तुष् (तुष्यति) to be pleased	शम् (शाम्यति) to be quiet	यम् (यच्छति) to restrain
नश् (नश्यति) to perish	क्षम् (क्षाम्यति) to forgive	दा (यच्छति) to give
नृत् (नृत्यति) to dance	श्रम् (श्राम्यति) to be weary	गुह् (गूहति) to hide
पुष् (पुष्यति) to nourish	मद् (माद्यति) to be glad	सद् (सीदति) to sit
मुह् (मुह्यति) to faint	व्यध् (विध्यति) to pierce	घ्रा (जिघ्रति) to smell
भ्रंश् (भ्रश्यति) to fall	भ्रम् (भ्राम्यति) to roam, to err	पा (पिबति) to drink
दंश् (दशति) to bite	ध्मा (धमति) to blow	स्था (तिष्ठति) to stand
निन्द् (निन्दति) to blame	हृ (हरति) to take away	दृश् (पश्यति) to see

कूपः well	ह्रदः lake	वनम् forest
गजः elephant	कुसुमम् flower	शीर्षम् head
चन्द्रः moon	जीवितम् life	न not
प्रासादः palace	धनम् wealth	च and

Translate the following into English:

नृप आचारं निन्दति। ह्रदं परितः कुसुमानि रोहन्ति। शरीरं नश्यति। दासो गजं पुष्यति। प्रासादमभितो नृत्यामः। नरः श्राम्यति जलं च पिबति। जनश्चन्द्रं पश्यति तुष्यति च। पत्राणि भ्रश्यन्ति। नृपो दासान् न क्षाम्यति। ह्रदं निकषा बाला दीव्यन्ति। कुसुमं जिघ्रामि। गजा धमन्ति। तृणं करं विध्यति। दासौ धनं हरतः। ह्रदं सर्वतो वृक्षास्तिष्ठन्ति। भ्राम्यामः। माद्यथः। शाम्यथ। दशति। बालाः श्राम्यन्ति मुह्यन्ति च। धनमन्तरेण जीवितं नश्यति। कुसुमे यच्छावः। बाला नृत्यन्ति नृपश्च सीदति। दासः कमलमस्यति। पात्रं गूहसि। अश्वं यच्छामि, अश्वश्च शाम्यति। शीर्ष नमति। कपोतः कुसुमं हरति।

3 Conjugate the following in the present tense, active voice:

दृश्, ध्मा, स्था, शम्, दिव् and व्यध्।

4 Translate the following into Sanskrit:

I throw fuel. Two men are dancing near the well. People run to the palace. The elephant eats leaves, drinks water and is pleased. Pigeons do not bite. Two servants hide the fruits and the food. I play and I am glad. We do not praise wealth. You two smell the flower. They stand on all sides of the village. Men dig the place and carry the gold away. You are weary and you sit. The horses are not quiet. The king is not pleased. The crow pierces the fruit. The boys faint. The man blames the two servants. Life without happiness becomes misery. We see the moon. Elephants live on both sides of the lake.

LESSON 5

1 Vocabulary

कृष् (कृषति)	to plough	मुच् (मुञ्चति)	to release	अनिलः	wind
क्षिप् (क्षिपति)	to throw	लुप् (लुम्पति)	to break	भारः	burden
तुद् (तुदति)	to strike	लिप् (लिम्पति)	to anoint	वीरः	hero
दिश् (दिशति)	to show	विद् (विन्दति)	to find	शृगालः	jackal
लिख् (लिखति)	to write	सिच् (सिञ्चति)	to sprinkle	हंसः	swan
विश् (विशति)	to enter	इष् (इच्छति)	to wish	गृहम्	house
सृज् (सृजति)	to create	प्रच्छ् (पृच्छति)	to ask	तीरम्	bank
स्पृश् (स्पृशति)	to touch	हस् (हसति)	to laugh	भूषणम्	ornament
कृत् (कृन्तति)	to cut	ह्वे (ह्वयति)	to call	~~रत्नम्~~	~~jewel~~

Prepositions governing the instrumental: सह with; विना without.

Translate the following into English: 2

सुखमिच्छामि। वीराय कुसुमानि यच्छति नृपः। शृगालो बालं दशति। कराभ्यां जलं स्पृशसि। भारेण दासः श्राम्यति। अनु तीरं हंसश्चलति। जनैः सह गृहं गच्छामि। भूषणैस्तुष्यति नरः। शरीरं लिम्पथः। जलेन विना कमलानि न रोहन्ति। करेण दासं तुदसि। रत्नानि विन्दति। जलेन कुसुमानि सिञ्चामः। अनिलो वृक्षान् लुम्पति। तृणेन गजान् पुष्यामि। आचारेण बालं निन्दति। चन्द्रं बालेभ्यो दिशन्ति। अन्नाय गृहं गच्छामि। हंसौ ह्रदं विशतः। प्रासादं निकषा वीरो वसति। इन्धनाय दासा वृक्षं कृन्तन्ति। सुखेन नरो नृत्यति। देशाय वीरो गृहं त्यजति। आचारः सुखं सृजति। दासं पृच्छति नरः। दुःखेन रत्नानि क्षिपावः। कपोतान् मुञ्चथः। करेण लिखामि। गृहमभितः कृषन्ति जनाः।

Conjugate the following in the present tense, active voice: 3

ह्वे, इष्, विद् and प्रच्छ्।

Translate the following into Sanskrit: 4

I give fruits to the two servants. Thou goest to the forest for flowers. He is glad by character. Misery breaks life. Owing to the wind the lotus perish. The jackal finds food. The two men call the servant. Through happiness the boys laugh and dance. The hero shows the jewels to the king. He sees the jackal and runs (away). Due to (his) conduct, he leaves (abandons) the house. For the sake of wealth men plough, carry burdens, dig the mountains and leave (their) country. Owing to the wind, the fruits fall. We sit near the bank. On all sides of the house, jackals roam. Clouds emit (सृज्) water. With the heroes you enter the palace. I stand near the lake with the boys. They see the lotuses and laugh with happiness. The swans move towards the bank. I show the swans to the boys.

LESSON 6

1 Vocabulary

अग्निः	fire	इन्दुः	moon
अतिथिः	guest	इषुः	arrow
अरिः	enemy	गुरुः	teacher
कविः	poet	तरुः	tree
गिरिः	mountain	परशुः	axe
मुनिः	sage	पशुः	beast
रविः	sun	बन्धुः	relative
राशिः	heap	बाहुः	arm
उदधिः	ocean	बिन्दुः	drop
कलिः	quarrel	शिशुः	baby

Prepositions governing the ablative

प्राक्	before, to the east	प्रभृति	since
पूर्वम्	before	बहिः	outside
अनन्तरम्	after	ऋते	except, without
आ	until, up to	विना	without

Prepositions governing the genitive

उपरि	above	अग्रे	in the presence of
अधः	below	परतः	beyond
पुरतः	in front of	समक्षम्	in the presence of
पश्चात्	behind	कृते	for the sake of

2 Translate the following into English after breaking up the Sandhis:

गिरेर्ग्रामं गच्छामि । परशुना वीरोऽरीन् तुदति । तृणस्य राशेरधः कविरिषुं विन्दति । अतिथीनां कृते दासः फलानि पचति । बाहुभ्यां तरुं लुम्पति । शिशू हसतः । अग्निर्वनस्य वृक्षान् दहति । मेघानामुपरि रविश्चलति । जलस्य बिन्दवः पात्रात् पतन्ति । इषुभिर्नृपोऽरिं जयति । गुरोर्गृहे भवतः । बालयोः कलिना नरो न तुष्यति । गृहस्य पश्चात् बन्धवः सीदन्ति । कपोतः काकः शृगालश्च पशवो भवन्ति । मुनेः समक्षं जनास्तिष्ठन्ति । प्राक् गिरेः पश्यामि इन्दुम् । उदधिं प्रति जलानि द्रवन्ति । ग्रामान् बहिः शृगाला वसन्ति । सुखात् ऋते जना न माद्यन्ति । गृहात् नरः शिशून् वनं नयति ।

3 Join the following sandhis:

गुरुणा अतिथिः । खादति अन्नम् । किन्तु अरिः । इषु अस्यति । अग्रे अश्वः । अग्रे इन्दुः । बालौ इन्धनम् । पश्यामि इन्दुम् ।

Translate the following into Sanskrit: 4

The poet shows the trees to the sage. The sage calls the boys. The boys stand in front of the house. The clouds move above the mountain. The arrows of the hero pierce the enemy. The boy falls from the tree and breaks (his) hand. The guests have no water. The servant takes away the food from the fire. The water of the ocean is calm. The beasts of the forest roam around the village. I hide the jewels behind the tree. The poet has a place in the presence of the king. From the babies up to the men, the people are tired. With (my) relatives I go from the mountain to the forest. He carries the axe with both arms. With heaps of leaves we feed the fire. Sages worship the sun. Owing to the quarrel, the teacher leaves the village.

LESSON 7

Vocabulary 1

कथ् (कथयति) to tell
क्षल् (क्षालयति) to wash
गण् (गणयति) to count
घुष् (घोषयति) to proclaim
चिन्त् (चिन्तयति) to think
चुर् (चोरयति) to steal
छद् (छादयति) to cover
दण्ड् (दण्डयति) to punish
धृ (धारयति) to owe

पाल् (पालयति) to protect
पीड् (पीडयति) to oppress
पूज् (पूजयति) to adore
भक्ष् (भक्षयति) to eat
भूष् (भूषयति) to adorn
रच् (रचयति) to arrange
सान्त्व् (सान्त्वयति) to console
स्पृह् (स्पृहयति) to long for (+ dative)

अति-क्रम् (अतिक्राम्यति) to cross
अधि-गम् (अधिगच्छति) to obtain
अनु-सृ (अनुसरति) to follow
अप-चर् (अपचरति) to depart
अभि-धाव् (अभिधावति) to attack
अव-दह् (अवदहति) to burn down
आ-नी (आनयति) to bring
उद्-भू (उद्भवति) to arise
उप-विश् (उपविशति) to sit

2 Translate the following into English after breaking up the sandhis:

Example : हे कवे, प्रासादे गुरुणा सह नपस्याग्रे तिष्ठसि।

हे कवे	voc. sing. of कवि : O poet,
प्रासादे	loc. sing. of प्रासाद : in the palace
गुरुणा	instr. sing. of गुरु : the teacher
सह	prep. governing गुरुणा : with
नृपस्य	gen. sing. of नृप : king
अग्रे	prep. governing नृपस्य : in the presence of
तिष्ठसि	2nd pers. sing., pres. tense, active of स्था : Thou standest.

O poet, in the palace thou standest with the teacher in the presence of the king.

वने पशवो जीवन्ति। हे बाला अग्नाविन्धनं क्षिपथ। कूपात् जलमानयति। कपोतान् गणयामः। वनस्य तरुषु मुनिर्वसति। गृहे करौ मुखं च क्षालयामि। नृपः शरीरं रत्नैर्भूषयति। सुखाय स्पृहयन्ति नराः। दुःखं धनात् उद्भवति। पत्रैः फलानि छादयति। ह्रदे हंसा दीव्यन्ति। हे गुरो बालानामाचारं निन्दसि। दासाय कुसुमे धारयामि। देशे वीरान् पूंजयामः। पात्रेषु कमलानि भवन्ति। नरा उदधिमतिक्राम्यन्ति। वृक्षं निकषोप्रविशथः। अनिलेन तरूणां पत्राण्युदधौ पतन्ति। गृहयोरन्नं भक्षयामि। वनेऽरय इषून् गृह्णन्ति। मेघेष्विन्दुश्चलति। अग्निस्तरू अवदहति। नृपं वीरं घोषयति कविः। बन्धूनां गृहात् नरो धनं चोरयति। शिशून् सान्त्वयामि। मुनिर्दासं न पीडयति।

3 Translate the following into Sanskrit:

The enemies attack the king's palace. In happiness, people are glad, in misery, people are weary. The clouds cover the sun. In both villages there is no water in the wells. On the bank of the lake the poet sits and thinks. We console the servant. Crows live in trees. Thou countest the drops. I arrange the jewels of the king. The swans cross the lake from bank to bank. Servants, you do not throw leaves on the fire. Boys follow the teacher. They sit with (their) relatives in the house. You two sit on the heap of grass. The child covers (his) face with both hands. The servant washes the vessels with the water of the well. The enemies are throwing arrows at the heroes. We owe jewels to the two teachers.

RECAPITULATION

Vocabulary 1

ईश्वरः	God	आरोग्यम्	health	अलिः	bee	वायुः	wind
पुत्रः	son	काव्यम्	poem	कपिः	monkey	मृत्युः	death
गुणः	virtue	दैवम्	fate	नृपतिः	king	प्रभुः	lord, master
लोकः	world	बलम्	strength	ऋषिः	seer	शत्रुः	enemy
विनयः	modesty	मांसम्	meat	ध्वनिः	sound	हेतुः	cause
जनकः	father	मित्रम्	friend	निधिः	treasure	साधुः	honest man
आकाशः	sky	वचनम्	saying	पाणिः	hand	रघुः	Raghu
आगमः	arrival	सौन्दर्यम्	beauty	विधिः	fate		
प्रसादः	favour	हलम्	plough	रश्मिः	ray		

नि-क्षिप् (निक्षिपति) to put down
निस्-वह् (निर्वहति) to carry out
परि-पत् (परिपतति) to fly round
प्रति-गम् (प्रतिगच्छति) to return
वि-अस् (व्यस्यति) to scatter
सम्-क्षिप् (संक्षिपति) to shorten

Adverbs and prepositions

अत्र	here	इव	like
तत्र	there	एवम्	thus
एव	just, only	अपि	even
अद्य	today	न कदापि	never
अधुना	now	सदा	always

Give: 2

the instrumental singular of पुत्रः, मित्रम्, निधिः and साधुः
the genitive dual of गुणः, काव्यम्, पाणिः and शत्रुः
the vocative singular of ईश्वरः, मित्रम्, नृपतिः and रघुः

Join the following sandhis: 3

निधिः भवति। पुत्रः तिष्ठति। अत्र एव। कपिः अपि। अधुना आनयति।
सदा इन्दुः। वने एव। वहति इन्धनम्। किन्तु एवम्। मुनी अपि।

What case is governed by the following prepositions: 4

अभितः, विना, पश्चात्, पूर्वम्, सह, उपरि, बहिः, निकषा?

Conjugate the following in the present tense, active voice: 5

हृ, मद्, लिप्, स्पृह्, अनु-सृ, वि-अस्

LESSON 8

1 Vocabulary

गङ्गा Ganges
रम्भा plantain-tree
मुद्रा seal, coin
शोभा splendour
भार्या wife
छाया shade
सन्ध्या twilight
भाषा speech
सभा assembly
रेखा line
माला garland
लता creeper
बालिका girl

नगरी town
नदी river
धात्री nurse
पृथिवी earth
वाणी voice
राज्ञी queen
सिंही lioness
जननी mother
नारी woman
पत्नी wife
भगिनी sister
गृहिणी house-wife
शर्वरी night

ईक्ष् (ईक्षते) to see
कम्प् (कम्पते) to tremble
गाह् (गाहते) to dive
जन् (जायते) to be born
डी (डीयते) to fly
मन् (मन्यते) to think
युध् (युध्यते) to fight
रुच् (रोचते) to please
मन्त्र् (मन्त्रयते) to consult
मृग् (मृगयते) to search
वि-जि (विजयते) to conquer
परा-जि (पराजयते) to defeat
आ-प्रच्छ् (आपृच्छते) to take leave of (+ accus.)

2 Translate the following into English after breaking up the sandhis:

शर्वर्याः शोभां शंसन्ति कवयः। पुत्रौ नगर्याः प्रतिगच्छतः। शीर्षात् नारी भारं निक्षिपति। मित्रे गङ्गायां गाहेते। नृपतेः समक्षं राज्ञी भगिनीमापृच्छते। कपिभ्यः फलानि रोचन्ते। गृहिणी मुद्रा गणयति। विधिर्दुःखस्य हेतुर्भवति। मेघानां रेखाकाशं भूषयति। सिंहीव जननी पुत्रान् रक्षति। सन्ध्यायां नृपतिररीन् पराजयते। रम्भामु काकौ परिपततः। बालिके कुसुमानि मृगयेते। जनन्या आगमेन बालिका मालां रचयन्ति। मुनेर्वचनानि संक्षिपति कविः। बलेनारीन् रघुर्विजयते। मांसं शृगालाय रोचते। दुःखे सुखे च नार्य ऋषिं मन्त्रयन्ते। मृत्यावपि वीरो न कम्पते। धात्री शिशुं न कदापि त्यजति। गङ्गा वने अन्तरा वहति। नद्यास्तीरे शत्रवो युध्यन्ते। अद्यैव नृपतिः सभायां नोपविशति। ईश्वरस्य प्रसादेन नरा आरोग्यमधिगच्छन्ति। तरोस्तरुं कपोता डीयन्ते।

Translate the following into Sanskrit: 3

Through fate, the enemies attack the town and conquer. Even today I do not see the Ganges. The voice of the queen pleases the poets. The speech of the child is the cause of the mother's happiness. We carry out the sacred precepts of the Ṛṣis. Just around the village men are bringing heaps of grass. Out of modesty the honest man worships God (as his) Lord. The sound of the waters of the Ganges pleases the sages. I sit in the shade of the tree and think. Like a jewel, the moon adorns the sky. Thus speaks the king. Here people have no wealth. The woman scatters the flowers of the garland on the earth. There the creepers adorn the trees with (their) flowers. We take leave of (our) mother and go to the teacher's house. Because of the splendour of the sky and of the earth we praise God the Lord.

Decline fully the following: 4

मुद्रा and धात्री।

LESSON 9

Vocabulary 1

कृ (करोति) to do, to make
वि-वद् (विवदते) to disagree
वृत् (वर्तते) to exist
नि-वृत् (निवर्तते) to desist from
उप-गम् (उपगच्छति) to approach
वि-सद् (विषीदति) to be sad
अधि-स्था (अधितिष्ठति) to live in (+ accus.)
परि-नी (परिणयति) to marry
अभि-नि-विश् (अभिनिविशते) to resort to (+ accus.)
आ-दृ (आद्रियते) to respect
भाष् (भाषते) to speak
आ-रभ् (आरभते) to begin
लभ् (लभते) to obtain

मतिः (*f.*) mind
शक्तिः (*f.*) power
भक्तिः (*f.*) devotion
तृप्तिः (*f.*) satisfaction
नीतिः (*f.*) conduct
केलिः (*f.*) jest
भूमिः (*f.*) earth
धूलिः (*f.*) dust
रात्रिः (*f.*) night

धेनुः (*f.*) cow
चञ्चुः (*f.*) beak
तनुः (*f.*) body
रज्जुः (*f.*) rope
रेणुः (*f.*) dust, pollen
हनुः (*f.*) jaw
कार्यम् work
घटः jar
आदेशः order

A few idioms containing the verb कृ

शीर्षे करोमि I place on my head
करे करोमि I take in my hand
क्षणं करोमि I wait one moment
मतिं करोमि I turn my mind to (+loc.)
पदं करोमि I set foot (+loc.)

2 Conjugate the following in the imperfect, active voice:

नी, ईक्ष्, उप-गम् and अभि-नि-विश्।

3 Decline fully the following:

रात्रिः and चञ्चुः।

4 Translate the following into English after breaking up the sandhis:

चञ्च्वा काको मांसमहरत्। प्रासादे पदमकरवं नृपतिं चोपागच्छम्। जनकस्यादेशात् बालो धेनू ग्रामात् बहिरनयत्। घटं कुरुतो दासौ। रज्ज्वा पुत्रो धेनुं कर्षति। जनन्यास्तृप्तये विनयमभिन्यविशेतां बालिके। हे रघो कार्यात् न न्यवर्तथाः। कुसुमात् कुसुमं रेण्वा अलिर्डीयते। शत्रूणामागमेन धूलिर्ग्रामं छादयति। मुनी विवदेते। मित्रस्य मृत्युना विषीदथः। शीर्षे भारमकुर्वन्। पशोर्हन्वारीनतुदत्। वनमध्यतिष्ठम्। नृपतेः पुत्रो गुरोर्भगिनीं पर्यणयत्। मित्रस्यागमे मतिमकरोत्। भूमौ तृणस्य राशयो वर्तन्ते। साधुः कार्यं रात्रौ नारभते। प्रभोः प्रसादेन दासास्तृप्तिमलभन्त। पुत्रो जनकं जननीं चाद्रियते। सभायां जनकोऽभाषत। मुनिर्नारीणां नीतिमशंसत्। ईश्वरस्य शक्तिं दैवं मन्यन्त ऋषयः।

5 Translate the following into Sanskrit:

Through God's favour he resorted to devotion. I was always fond of jest. Two boys took the rope in their hand. The girl adorned (her)

body with jewels. Owing to the clouds and the dust the cows did not eat grass. Even for the sake of (his) friends a honest man does not desist from virtue. Men think Raghu (to be) a hero. At night a sky without moon is like a lake without lotus. By order of the teacher we began the work. He spoke thus and the people of the town praised the power of the king. You took the pigeons in your hand. We two always disagree. You two obtained happiness owing to (your) modesty. Two friends found a treasure and carried (it) home.

LESSON 10

Vocabulary 1

दातृ (दाता) *m.* donor
कर्तृ (कर्ता) *m.* doer
नेतृ (नेता) *m.* leader
श्रोतृ (श्रोता) *m.* hearer
सवितृ (सविता) *m.* sun
जेतृ (जेता) *m.* conqueror
नप्तृ (नप्ता) *m.* grandson
पितृ (पिता) *m.* father
भ्रातृ (भ्राता) *m.* brother
जामातृ (जामाता) son-in-law

दुहितृ (दुहिता) *f.* daughter
मातृ (माता) *f.* mother
ननांदृ (ननांदा) *f.* sister-in-law
स्वसृ (स्वसा) *f.* sister
रथः chariot
शठः rogue
उद्यानम् garden
स्वस्ति hail ! (+ dat.)
पुनर् (पुनः) again
प्रातर् (प्रातः) early

क्रोधः anger
लोभः greed
कामः desire
मोहः illusion
नाशः destruction
पापम् sin
कारणम् cause
प्र-भू (प्रभवति) to arise, to be produced
प्र-वृत् (प्रवर्तते) to proceed
खण्ड् (खण्डयति) to break

Decline fully the following: जेतृ and स्वसृ । 2

Conjugate the following in the imperative mood, active voice: सृ and ईक्ष् । 3

4 Translate the following into English after breaking up the sandhis:

रथेन जेता गच्छतु। दुहितरो मातरं नमन्तु। नेत्रे स्वस्ति। शठ उद्यानात् फलान्यचोरयत्। श्रोतारो गुरोर्वचनैस्तुष्यन्तु। भ्रात्रा सह स्वसारं मृगयै। हे बाल पितरमापृच्छस्व। हे नप्तर्मा विषीद। भार्यया सह जामाता पितुर्गृहं गच्छतु। दातारौ ननांद्रे मालामयच्छताम्। जीविते कर्तार एव सुखमधिगच्छन्ति। नेतारमनुसराम। प्रातः सविताकाशे रात्रिं पराजयते। पुनर्मन्यध्वम्। लोभात् शठः पापं करोति। पितरं मातरं चाद्रियामहै। प्रातः कार्यमारभेथाम्। हे श्रोतरः, पापात् निवर्तध्वम्। हे नप्तारौ, मित्राणामग्रेऽपि विवदेथे।

लोभात् क्रोधः प्रभवति लोभात् कामः प्रवर्तते।
लोभात् मोहश्च नाशश्च लोभः पापस्य कारणम्॥

5 Translate the following into Sanskrit:

Out of anger (my) brother broke the jar. May the donors give wealth to the people of the villages! Let him live in the forest. See the beauty of the garden. You desire happiness: desist from greed. The man sat in the garden with (his) two grandsons. Hail to the poets! O sister, do not abandon the house. The hearers stood again in front of the palace. Through the destruction of the enemies the conqueror has freed (released) the country. May I always live among (my) brothers! Let the leader punish the rogues. O daughters, follow (your) mother up to the house. May sin, the cause of misery, perish! O heroes, fight with the enemies, follow the leader and protect the country.

LESSON 11

1 Vocabulary

वधूः bride	यदि if	किन्तु but; तड् (ताडयति) to beat
चमूः army	एकदा once upon a time	कुप् (कुप्यति) to be angry (+ dat.)

श्वश्रूः mother-in-law	तारा star	क्लृप (कल्पते) to be fit for (+ dat.)
असिः (*m.*) sword	दासी maid-servant	अव-गम् (अवगच्छति) to know
आश्रमः hermitage	दुर्जनः wicked person	उद्-स्था (उत्तिष्ठति) to rise
औषधम् medicine	नेत्रम् eye	तुल् (तोलयति) to weigh
क्षेत्रम् field	पुस्तकम् book	आ-दिश् (आदिशति) to order, to command
विद्या knowledge	भयम् fear	प्र-बुध् (प्रबोधति) to wake up
	सत्यम् truth	मृ (म्रियते) to die; अस् (अस्ति) to be

Decline fully: श्वश्रूः **2**

Conjugate the following in the potential mood, active voice: **3**

कुप्, प्र-बुध्, मृ, कृ and अस्।

Translate the following into English after breaking up the sandhis: **4**

श्वश्रूर्वध्वै न कुप्येत्। मुनयोऽधितिष्ठेयुराश्रमम्। विद्या साधूनां निधिः स्यात्। एकदा प्रातः प्राबोधं क्षेत्रेषु चागच्छम्। हे नेतरादिश, चम्वा वीराणां भयं नास्ति। दुर्जना विद्यायै न कल्पेरन्। हे बालौ, सर्वदा सत्यं भाषेयाथाम्। असिनेव नेत्रेणर्षिर्जनानां मतीर्विध्यति। उत्तिष्ठन्तु नरा नार्यश्च शत्रूणां च भयात् देशं मुञ्चन्तु। नृपतिं परितो दास्य इव चन्द्रं परितस्ताराः कम्पन्ते। गुरवः शास्त्राण्यवगच्छेयुः। तोलयेरौषधम्। पुस्तकेभ्य एव विद्यां न लभेध्वम्। यदि दुर्जना लोके जयेयुर्मुनयो भाषाया निवर्तेरन्। ताडय यदीच्छसि किन्तु पितुरादेशं स्मर। प्रातः प्रबोधेत् नरः, दुर्जनान् त्यजेत्, ईश्वरं पूजयेत्, भ्रातॄन् सान्त्वयेत्, सत्यं वदेत्; यद्येवं कुर्यात् न कदापि दुःखस्य कारणं स्यात्।

Translate the following into Sanskrit: **5**

On the order of the king the army may set out for the village. If you were to rise early, you would roam along the river's bank. People should know the modesty of the sages. Wait a moment: I just put down (my) book and come. Maid-servants should follow the bride up to the house of (her) mother-in-law. If you long for knowledge, you should dwell in a hermitage with (your) teacher. You tremble out of fear of God; you should worship God out of devotion. Men live

and die, kings conquer and perish; truth alone does not die. Like a star in the sky, like a lotus in the lake, like a flower on a creeper, the sage should live in the world for the happiness of men. Do not be angry with (your) friend; anger could only be the cause of sin.

LESSON 12

1 Vocabulary

	Adjectives forming their feminine in आ *and their neuter in* अम्		
वारि water			
मधु honey	अन्ध blind	क्षुद्र small, mean	प्रसन्न favourable, clear
अश्रु tear	उदार generous	खञ्ज lame	पीन fat
अम्बु water	काण one-eyed	तीव्र sharp, acute	मृत dead
जानु knee	कुशल skilful	दुर्लभ difficult to get	वृद्ध old
वस्तु thing	कृत्रिम artificial	नव new	व्याधित sick
दारु wood	कृपण wretched	नित्य regular, obligatory	हत killed

Adjectives in इ, उ *and* ऋ			*Verbs*
सुगन्धि sweet-smelling	आशु swift	दातृ generous	वन्द् (वन्दते) to salute
सुरभि fragrant	चारु lovely	कर्तृ doer	अधि-क्षिप् (अधिक्षिपति) to abuse
शुचि pure	गुरु heavy	जेतृ victorious	पद् (पद्यते) to go, to obtain
बहु much, many	मृदु soft	वक्तृ eloquent	वि-पद् (विपद्यते) to fall into misfortune
साधु virtuous	स्वादु sweet	गन्तृ going	सम्-पद् (सम्पद्यते) to prosper

Translate the following into English after breaking up the sandhis: **2**

व्याधितया स्वस्रा सह गृहं गच्छेयम्। प्रसन्ने वारिणि पीनाः शिशवो दीव्यन्ति। अन्धस्य नृपतेः कृपणे दुहितरौ व्यपद्येताम्। दात्र्यै मात्रे कुशलाः पुत्रा दुर्लभं रत्नं यच्छन्तु। तीव्रेण दुःखेन वृद्धाया नार्या नेत्राभ्यामश्रूणि द्रवन्ति। हे स्वसः पितुर्गृहे तिष्ठेः। आशुनाश्वेन वीरः शत्रुमभ्यधावत्। दुर्जनः खञ्जं नरमधिक्षिपति। गुरून् भारान् दासाः शीर्षेऽकुर्वन्। साध्वी दुहिता मातरं वन्दते। प्रभोः समक्षं दास्यौ जानुभ्यां भूमावपतताम्। चारवो लताः सुरभीणि कुसुमानि चोद्याने रोहन्ति। कृत्रिमेण क्रोधेन क्षुद्रं बालं निन्दानि। यदि नित्यानि कार्याणि कुर्या न विपद्येथाः। बहवः शिशवो मधुने स्पृहयन्ति। अरेस्तीव्रेणासिना हतं वीरं वन्दामहै। ग्रामं गन्तारो मुनयः कूपस्य स्वाद्वम्बु पिबन्तु। नवस्य प्रासादस्य पश्चात् क्षुद्राणि गृहाणि सन्ति।

Make the following adjectives agree with the following nouns: **3**

कुशल	with	नरेषु,	नारीषु,	कविना,	शत्रवे
शुचि	with	बालौ,	जले,	मती,	दुहितुः
चारु	with	कुसुमम्,	वारिणः,	बालिकया,	नद्याम्
वक्तृ	with	नृपेण,	मित्रम्,	गृहिणी,	श्वश्रूणाम्

Translate the following into Sanskrit: **4**

O Lord, be favourable! A skilful leader obtains many things. The one-eyed servant burnt the heap of soft wood. A pure mind is like a fragrant flower. Let the eloquent queen lead the heroes. Hail to the victorious king! You insult the wretched blind men, but you do not blame the wicked man. Persons of the village carried the bodies of the dead heroes to the bank of the river. In the lovely garden many creepers and many trees scatter (their) fragrant flowers on the soft ground. Let the victorious hero pierce the enemy with (his) sharp sword. Sick and wretched, the travellers (गन्तृ) stood near the well. In (his) new book the teacher has summarized many things.

LESSON 13

1 Vocabulary

अस्मद् I	धर्मः duty	वधः killing	किम् what?
युष्मद् thou	अर्थः wealth	दर्शनम् sight	समीपम् near (+gen.)
तद् that, he	मुक्तिः *f.* salvation	अभिधेयम् name	कतरः which of the two?
एतद् this	गोपालः Gopāla	विमूढ bewildered	भृशम् greatly, violently
शरः arrow	मलहारकः sweeper	स्निह् (स्निह्यति) to feel affection (+ loc.)	निरपराध innocent
सूतः charioteer	सुमतिः Sumati	सेव् (सेवते) to serve	प्र-विश् (प्रविशति) to enter
स्तेनः thief	पारिषदः courtier		अव-लोक् (अवलोकयति) to see

2 Conjugate:

in the present tense passive: नी, कृ and दा
in the imperfect tense passive: चिन्त्, मुच् and वि-जि
in the imperative passive: सेव्, अधि-क्षिप् and चुर्
in the potential passive: तुद्, स्मृ and लभ्

3 Translate the following into English:

एतस्मिन् देशे गोपालोऽभिधेयेन नृपतिरवसत्। एकदा प्रातस्तेन नगर्यां मलहारकोऽदृश्यत। तस्य दर्शनेन नृपो भृशमकुप्यत्, मलहारकस्य वधमादिशत् च। नृपतेरादेशेन निरपराधो जनो विमूढोऽभवत्। नृपस्य सभायां सुमतिरभिधेयेन पारिषद आसीत्। स मलहारकमभाषत – "वधात् पूर्वमेव मम समीपमागच्छ। त्वया वचनं भाष्यताम्।" वधस्य स्थानमगच्छत् मलहारकः। वधात् पूर्वं स सुमतेः समीपमगच्छत्। तं वचनमभाषत। किन्तु तौ नृपेणादृश्येताम्। नृपतिः सुमतिमपृच्छत् – "तेन दुर्जनेन किमभाष्यत?" सुमतिरवदत् – "एतद् तस्य वचनम् – प्रातर्मया नृपो-

ऽवालोक्यत। तस्य दर्शनात् मम वधो भवति। नृपेणापि प्रातरहमदृश्ये। किन्तु मम दर्शनात् तस्य वधो नास्ति। आवयोः कतरो दुर्जनः ?" नृप एतानि वचनान्यचिन्तयत्। क्षणात् अनन्तरं स क्रोधात् न्यवर्तत मलहारकं चामुञ्चत्।

Translate the following into Sanskrit (use the personal pronouns): 4

I lead. We two are led. We go. Thou art remembered. You two run. You are abandoned. He plays. She is protected. It is burned. They two (*m.*) move. They (*f.*) are conquered. They (*n.*) are cooked. I dug. We two were nourished. We danced. Thou wert blamed. You two perished. You were taken away. He blew. She was seen. It was quiet. The two (*f.*) were struck. They (*n.*) were created. Let me plough. Let both of us be released. Let us touch. Do thou enter. Let both trees be sprinkled. Do you throw the arrows? Let him be punished. Let her go. Let it be told. Let them (*m.*) both wash. Let them (*f.*) be counted. I should not steal. It should not be stolen. They (*m.*) should not oppress them (*f.*). They (*f.*) should not be oppressed by them (*m.*). It should be brought. You two should be followed. Flowers should be scattered. You two (*f.*) should not disagree. It should be done.

LESSON 14

Vocabulary 1

इदम् this
अदस् that
आ-गम् (आगच्छति) to come
वि-स्मृ (विस्मरति) to forget

अधम inferior
अन्तिम last
असीम boundless
आचार्यः preceptor

आशा hope
कन्या daughter
कथा story
जिह्वा tongue

क्रीड् (क्रीडति) to play	दूत: messenger	लज्जा shame
भञ्ज् to break	सर्प: snake	अत एव therefore
ग्रह् to seize	हरि: Hari	अन्यथा otherwise
शास् to order	राम: Rāma	अलम् enough (+instr.)
वच् to speak	सीता Sītā	इति so, thus
बन्ध् to bind	लघु light	चिरम् for a long time
प्र-काश् (प्रकाशते) to shine	भर्तृ (भर्ता) husband	तूष्णीम् silently

2 Translate the following into English and change the voice:

माता पुत्रं न कदापि विस्मरति। इदमन्तिमं कुसुमं तुभ्यं यच्छानि। रामः सीतां वनेऽत्यजत्। क्षुद्रः सर्पो हरिमदशत्। अमूं कथां कथयत। दूतौ नृपतेः पत्रमानयताम्। अनेन दुःखेनालम्! नेतारं वीरैः सहानुसराम। इमं लघुं भारं वह; अन्यथा प्रभुस्त्वां ताडयेत्। कन्याया वधोऽधमेन नरेणादिश्यते। मम वचनानि यदि यूयमवगच्छेत यूयमाशां न त्यजेत। वयं रामं वीरं मन्यामहे। त्वं पापमकरोः, अत एवाहं त्वां निन्दामि। स्तेनेन बहूनि रत्नान्यचोर्यन्त। दुर्जनानां धनं विधिना ह्रियतामिति सुमतिनोद्यते। चिरं प्रासादमधितिष्ठ। हे बालौ, युवामाचार्यं तूष्णीं सेवेयाथाम्।

3 Translate the following into Sanskrit:

That boundless ocean was seen by many heroes. Two trees were broken by the wind. Let the thief be seized! I am ordered by the preceptor. Two cows were bound with a rope. Enough with shame! Let your tongue move and let your eyes shine. Our father was given a rare (दुर्लभ) book (=a rare book was given to our father). The work should be begun now. If truth be not spoken, you will be punished (potential). They two may be blamed for their conduct. For a long time the sage stood silently before the dead body of his son. Let the wretched girls be brought to the house; otherwise they might die. You two should never forget your generous mother. Thou art called by thy father.

RECAPITULATION

Vocabulary **1**

शस्त्रम् weapon
प्रतिपत्तिः *f.* fame
हास्यम् ridicule
वृद्धत्वम् old age
चक्रम् wheel
गतिः *f.* motion
पुरुषकारः human effort
उद्यमः effort
मनोरथः desire
मृगः deer
कौन्तेयः Arjuna
सख्यम् friendship
प्रीतिः *f.* affection
अङ्गारः charcoal
गानम् song

आद्य first
द्वितीय second
एक one
सुप्त asleep
दरिद्र poor
पथ्य wholesome
नीरुज healthy
उष्ण hot
शीत cool, cold
कृष्ण black
श्वेत white
रक्त red
पीत yellow
नील blue
हरित green

सदा always
हि for, indeed
यथा as, तथा so
समम् with (+ instr.)
दिवा in day-time
नक्तम् at night
रहसि in secret
वृथा in vain
ह्यः yesterday
श्वः tomorrow
शनैः slowly
सपदि at once
सहसा suddenly
सकृत् once
कदापि sometimes

प्र-दा (प्रयच्छति) to bestow
कारय (कारयति) to perform, to establish
कृष्णाय (कृष्णायते) to make black
सिध् (सिध्यति) to succeed
सह् (सहते) to endure
शिक्ष् (शिक्षते) to learn
शुच् (शोचति) to grieve
वृध् (वर्धते) to increase
वेप् (वेपते) to tremble
लुट् (लुटयति) to wallow
गै (गायति) to sing
भृ (भरति) to feed, to support

2 Decline the following: चारुः लता in the singular; शुचि जलम् in the dual; स उदारः नेता, in the plural; अस्मद् in the singular; युष्मद् in the plural; इदम् in the feminine dual; अदस् in the masculine plural.

3 Conjugate the following: शुच् in the imperfect active; भाष् in the imperative passive; सम्पद् in the potential active; उद्-स्था in the imperative active.

4 Frame sentences containing the following words: वृथा, शनैः, दिवा, सदा, सहसा, सपदि, ह्यः।

5 Translate into English the following verses taken from the *Hitopadeśa*:

विद्या शस्त्रस्य शास्त्रस्य द्वे विद्ये प्रतिपत्तये। (द्वे=two)
आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा॥
यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।
एवं पुरुषकारेण विना दैवं न सिध्यति॥
उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥
दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्।
व्याधितस्यौषधं पथ्यं, नीरुजस्य किमौषधैः॥
दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत्।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम्॥

LESSON 15

1 Vocabulary

जलमुच् (जलमुक्) *m.* cloud
ऋच् (ऋक्) *f.* hymn
त्वच् (त्वक्) *f.* skin
वाच् (वाक्) *f.* speech
भूभृत् *m.* king
विद्युत् *f.* lightning
तडित् *f.* lightning
सरित् *f.* river
समिध् (समित्) *f.* fuel
प्रावृष् (प्रावृट्) *f.* autumn
दिश् (दिक्) *f.* direction
असृज् (असृक्) *n.* blood

शुच् (शुक्) *f.* grief	सुहृद् (सुहृत्) *m.* friend	चन्द्रमस् (चन्द्रमाः) *m.* moon
वणिज् (वणिक्) *m.* merchant	उद्भिद् (उद्भित्) *m.* plant	वेधस् (वेधाः) *m.* Creator
भिषज् (भिषक्) *m.* doctor	आपद् (आपत्) *f.* adversity	पयस् (पयः) *n.* water, milk
ऋत्विज् (ऋत्विक्) *m.* priest	विपद् (विपत्) *f.* danger	उरस् (उरः) *n.* breast
सम्राज् (सम्राट्) *m.* emperor	सम्पद् (सम्पत्) *f.* wealth	चेतस् (चेतः) *n.* mind
परिव्राज् (परिव्राट्) *m.* mendicant	परिषद् (परिषत्) *f.* assembly	मनस् (मनः) *n.* mind
स्रज् (स्रक्) *f.* garland	शरद् (शरत्) *f.* autumn	यशस् (यशः) *n.* fame
मरुत् *m.* wind	क्षुध् (क्षुत्) *f.* hunger	वयस् (वयः) *n.* age

Join the sandhis in the following: 2

समित् आसीत्। अनयत् भारम्। एतद् तृणम्। युष्माभिः रक्ष्यताम्। दिक् गजः। प्रावृट् आगच्छति। ह्यः अत्यजत् भ्रातरम्। सपदि अपश्यत् दुहितरम्। सम्राट् गजम् दण्डेन अताडयत्। तस्मात् ग्रामात् बहवः जनाः फलानि आनयन्ति। तस्मै अदीयेताम् अश्वौ। वणिक् लभते इन्धनम्। वणिजौ लभेते इन्धनम्।

Decline the following: भूभृत् and विद्युत्। 3

Translate the following into English after breaking up the sandhis: 4

मरुताकम्पन्त तरवः। विद्युद् मेघेषु प्रकाशते। राज्ञी भूभृति स्निह्यति। जनैर्भूभृते श्वेतावश्वावदीयेताम्। सरितामम्बून्युदधौ वहन्ति (flow)। अस्माकमुद्याने श्वेतानि रक्तानि पीतानि च कुसुमानि सन्ति। अमूभिर्नारिभी रहसि कथा उच्यन्ते। सहसा कृष्णा मेघास्तडिताविध्यन्त। वृथावाभ्यां दुःखानि सह्यन्ते। सुप्तस्य शिशोश्चारु मुखमीक्षध्वम्। सपदि प्रासादं धाव, नृपो हि त्वामाह्वयति। युष्मद् दरिद्रा नरा धनं लभन्ताम्। असौ मुनिः सकृदागच्छत्। जलस्य बिन्दुभी रवेः रश्मिभिश्चैव वनस्य कुसुमानां शोभा वर्धते। लोभेन मतिश्चलति, विमूढायां मत्यां दुःखानि प्रविशन्ति। गानं गीयतां युष्माभिः। कमलानां जलं विना यथा सौन्दर्यं नश्यति दरिद्राणामाशां विनैवं शनैर्लज्जा वर्धते।

5 Translate the following into Sanskrit:

The thieves were seized by the husband. The lightning plays among the black clouds. We dived into the cool water of the river. The leaves are taken away by the wind. You two go at once to the forest for your brother is there and calls you. In day-time you do not work; at night you sit down in the garden and sing. The king rose suddenly and departed from the palace. Why (किम्) should you grieve? Friends sit around you, brothers and sisters are full of affection for you. Should you be abused by that rogue, remain silent: charcoal blackens the hand only if it is touched. O friend, you came once only to our house and you were never seen again. Sick and wretched, the king's messenger was bound and led to the forest.

LESSON 16

1 Vocabulary

विश् (विट्) *m.* Vaiśya
ककुभ् (ककुप्) *f.* direction
द्वार् (द्वाः) *f.* door
तेजस् (तेजः) *n.* glare, energy
शिरस् (शिरः) *n.* head
तपस् (तपः) *n.* penance
सदस् (सदः) *n.* residence
हविस् (हविः) *n.* oblation
ज्योतिस् (ज्योतिः) *n.* light
प्रिय dear

गिर् (गीः) *f.* voice
पुर् (पूः) *f.* town
धुर् (धूः) *f.* yoke
द्विष् (द्विट्) *m.* enemy
आयुस् (आयुः) *n.* life
धनुस् (धनुः) *n.* bow
चक्षुस् (चक्षुः) *n.* eye
मधुलिह (मधुलिट्) *m.* bee
उपानह् (उपानत्) *f.* shoe
विद् (विद्यते) to happen, to be

सुमनस् (सुमनाः) *m.* learned man
उषस् (उषाः) *f.* dawn
तमस् (तमः) *n.* darkness
स्थित standing
निर्गुण worthless, without quality
सत्त्वम् being, vigour
दया compassion
सम्-हृ (संहरति-ते) to withdraw
कामदुह् (कामधुक्) wish-yielding cow

Decline the following: 2

ककुभ् in the singular; पुर् in the dual, सदस् in the plural; उषस् in the singular; हविस् in the dual; उपानह् in the plural.

Translate the following into English: 3

धनुषा शत्रुषु वीराः शरान् मुञ्चन्ति। रविश्च चन्द्रमाश्च लोकस्य ज्योतिषी। वणिग् द्वारि स्थितेभ्यो दरिद्रेभ्यो वसु यच्छेत्। ऋत्विग्भिर्हविरग्नौ क्षिप्यते। पुरि युष्माकं सदो विद्यते। उपानहौ करेऽकरवं ह्रदस्य जलं च प्राविशम्। त्वं लघुं भारं शिरसि कुरु, अहं गुरुं भारं कराभ्यां वहामि। चक्षुर्भ्यां पश्यन्ति जनाः। विद्युतस्तेजसा मम चक्षुषी पीड्येते। हे प्रिय भ्रातस्तवायुषि सुखं भवेत्। द्विषां चमूः सम्राजा पराजीयत। मृद्व्या गिरा गायन्तु बालिकाः। दुर्जनस्य मनसि दया न विद्यते। उषसस्तेजसा रात्रेस्तमो नश्यति। एतस्या धेन्वाः पयो शिशुः पिबति। आपदि च सम्पदि च साधोश्चेतः प्रसन्नमस्ति। मधुलिड्भिः कुसुमानां रेणुर्गृह्यते। कामदुहं सेवेयाथाम्। स्रग्भिर्भूषयन्तु सदः। परिव्राड् ग्रामाद् ग्रामं गच्छति। व्याधितायै भगिन्या औषधं भिषजादीयत। अलं वाचा कार्यं एव सत्त्वं दृश्यते। हे प्रभो क्षुधा पीड्ये मयि दयां कुरु।

Translate the following into Sanskrit: 4

In autumn the fruits fall from the trees. Around the fire the priests were standing and singing hymns. May your head be adorned with flowers, your arms with a bow, your mind with compassion, your life with happiness! In the assembly, the poets proclaimed the fame of the emperor. Upon her breast the blood of the child killed by the enemy was seen. O worthless servant, you have forgotten your master! May I stand by you, O mother, in danger and adversity! Due to anger, light shone in his eyes, his bow fell from his hands and his mouth quivered. The sage should practise (कृ) penance for a long time, restrain his speech and guard his mind from sin. Pigeons fly in the direction of the wind. The learned man standing at the door was attracted by the voices of the children.

LESSON 17

1 Vocabulary

आयुष्मत् long-lived

बलवत् strong

भगवत् (भगवान्) *m.* God

मतिमत् prudent

धीमत् talented

श्रीमत् rich

ज्ञानवत् learned

धनवत् wealthy

हिमवत् (हिमवान्) *m.* Himalaya

हनुमत् (हनुमान्) *m.* Hanumān

विनोदः diversion, pastime

कालः time

व्यसनम् dissipation, need

मूर्खः fool

निद्रा sleep

कलहः quarrel

स्मि (स्मयते) to smile

परि-भू (परिभवति) to overcome

परि-वृत् (परिवर्तते) to turn

परि-हृ (परिहरति) to avoid

परि-हस् (परिहसति) to laugh at

परुष hard, rough

आकुल disturbed, afflicted

दीर्घ long

2 Translate the following into English:

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥

हे भगवन् बलवन्तं मां कुरु। श्रीमन्तो धनवन्तश्च संपद्यपि सुखं न विन्दन्ति। एतस्यां पुरि श्रीमतो वणिजः पुत्रोऽजायत। मतिमान् मूर्खं परिहसति। दीर्घात् कार्यादनन्तरमहं निद्रया पर्यभूये। ऋत्विजः पुत्रो धीमतो भिषजो दुहितरं पर्यणयत्। ज्ञानवान् परिव्राट् हिमवन्तमुपागच्छत्। भगवानस्माकं पिता। सोऽस्मभ्यं जीवितं यच्छति विपदोऽस्मान् रक्षति सुप्तानस्मान् पालयति च। अत एव तं वयं वन्देमहि। मूर्खाः परुषाणि वचनानि वदन्ति। मतिमद्भिर्मृदूनि वचनान्युच्यन्ते। हे बाला आयुष्मन्तो भवत। स बलवानस्तु, तस्य यदि विनयो न स्याद् बलेनैव किं क्रियेत? चक्रमिव परिवर्तन्ते सुखानि च दुःखनि च। अलं विनोदेन। धीमद्भिर्जनैः कार्यं न परिह्रियेत।

Change the following to the passive impersonal: 3

अश्वौ धावतः। मतिमन्तस्तूष्णीं तिष्ठन्तु। कमलं रोहति। वयमगच्छाम।

Change the following to the active voice: 4

वृक्षैर्वेप्यते। युष्माभिः क्रीड्यताम्। ताभ्यां नारीभ्यां भाष्येत। अमुनोपाविश्यत।

Translate the following into Sanskrit: 5

Smile always, in prosperity as well as in adversity. Learned men are not disturbed by the speech of the fools. Around the residence of the wealthy many poor and sick people long for happiness. Through hard and long penance, the sages have crossed the ocean of misery. O talented one, you should avoid the dangers of riches. In sleep, the fool forgets his illusion, the learned man forgets his knowledge, the poor forgets his misery.

LESSON 18

Vocabulary 1

स्ना to bathe
श्रु to hear
चि to collect
आप् to obtain
दीप् (दीप्यते) to shine
स्तु to praise
याच् (याचते) to beg
जल्प् (जल्पति) to prattle
मा to measure
रुद् to cry
रम् (रमते) to sport
क्षण् to hurt
तन् to spread
हन् to kill
स्वप् to sleep
रुध् to obstruct
क्षुभ् (क्षुभ्यति) to be agitated
हा to abandon
भिद् to break
तॄ (तरति) to cross
पॄ to fill
छिद् to cut
दॄ to tear
ली to stick, to adhere
लू to cut
धा to put
शुष् (शुष्यति) to dry

2 Decline the following:

ज्ञानवत् in the masc. sing.; अयुष्मत् in the neuter plur.

3 Make the present participle active of चुर्, मन्, सृ and मृ agree with the following: मित्रम्, दुर्जनयोः, नप्तारम् and कपिषु।

4 Give the present participle passive of the following: अव-गम्; नि-क्षिप्; आप्, हन्, धा, पा, वच्, वह्, व्यध्, दंश्।

5 Translate the following into Sanskrit:

The children abandoned by their mother roam in the forest. The food begged by that poor has not been touched. The broken jar should be taken away. See those fruits collected by the sage's daughters. Yesterday the house was filled with guests. The jewels stolen from the king's palace were thrown into the river.

6 Give the perfect participle active of the following:

धा, हन्, लभ्, श्रु, अनु-सृ, रुध्, दा।

7 Decline the following:

जितवत् in the neuter sing.; अस्तवत् in the masc. plur.

LESSON 19

1 Vocabulary

वस्त्रम् garment
मार्गः path
हारः necklace
भोजनम् meal
मूषकः mouse

आहारः food
बिलम् hole
पराक्रमः bravery
अपराधः offence
जालम् net

दन्तः tooth
कृतज्ञता gratitude
प्रभूत much, many
भयंकर fearful
विषन्न dejected

अलम्-कृ (अलंकरोति) to adorn
परिहर्तव्य to be avoided
सानन्दम् joyfully
उच्चैः loudly

Translate the following into English: 2

पर्वतस्य समीपे वनमासीत्। तस्मिन् वने सिंहोऽवसत्। स च दिवा गिरौ सुप्तो रात्रौ वने परिभ्रमन् पशूनभक्षयत्। कदाचित् प्रभूतमाहारं चितवानयं सिंहो वृक्षस्य छायायां निद्रया परिभूतः। बहवो मूषका बिलाद् बहिरागताः सानन्दं सिंहस्य शरीरेऽनृत्यन्। तेन पीडितः सिंहः प्रबुद्धोऽभवत्। मूषकाणामेकः सिंहेन गृहीतः। तेनोक्तम्—"भोः प्रभो, त्वं पशूनां सम्राट् श्रूयसे। तव पराक्रमो ज्ञातः। अहं क्षुद्रस्त्वं बलवान्। अत एव मयि दयां कुरु।"—सिंहो मूषकस्य वचनं श्रुतवांस्तं च मुक्तवान्। तदनन्तरं नरेण तस्मिन्नेव वृक्षे जालं बद्धम्। तस्मिञ् जाले पतितः स सिंहः। तेनोच्चै रुदितम्। तं श्रुतवान् मूषक आगत उक्तवान्—"हे प्रभो! अलं भयेन। अस्माज्जालादहं त्वां मुञ्चामि।" स जालं दन्तैरकृन्तत्। सिंहेनोक्तम्—"अहो मम मित्रस्य कृतज्ञता!"

Translate the following into Sanskrit, rendering all finite verbs by participles: 3

Many women were killed, their bodies were torn by the lions' teeth. Abundant food was given to the poor children. People honoured (पूज्) by fools have always been laughed at by intelligent men. The necklace fell from the bride's hands and the pearls were scattered. They ate their meal and slept. The victorious enemies entered the city by force. The path was obstructed with fallen trees. Our men crossed the river, fought like heroes and seized the leader of the enemies. The place was measured, fuel was brought and the darkness suddenly shone with light. You forgave my offence.

Change the voice in the following: 4

भ्रातृभ्यां रक्षितः शिशुः। आहारो दरिद्रैर्याचितः। बहवो नरा देशं त्यक्तवन्तः। मया गीतम्। यूयं जल्पितवन्तः। भगवान् मुनिभिः स्तुतः। हरेरिषुभिर्वीरौ क्षतौ। ऋत्विक् शुष्कं दार्वग्नौ क्षिप्तवान्। नृपेणोक्तम्।

Join the following sandhis: 5

आनयत् जलम्। गच्छन् त्वम् मित्रे ऐक्षथाः। अपश्यन् इन्दुम्। तान् चलतः अहं दृष्टवान्। एतद् च। एतान् शत्रून्। एतद् शरीरम्।

LESSON 20

1 Vocabulary

कियत् how great, how much
यावत्···तावत् as much as
गुणिन् virtuous
ज्ञानिन् learned
मन्त्रिन् (मन्त्री) *m.* minister
रोगिन् sick
तेजस्विन् bright
स्वामिन् (स्वामी) *m.* husband, master
शशिन् (शशी) *m.* moon

इयत् so much
एतावत् so much
दृढ firm
पृथु broad
कृश thin
पटु clever
स्थिर steady
स्थूल big
उरु wide
क्षिप्र quick

महत् great
भवत् your honour
अल्प little
अन्तिक near
भोगः pleasure
भुज् to enjoy
तप् (तपति) to do penance, to burn
या to go
सर्व all

बलिन् strong
धनिन् rich
भीमः Bhīma
तृष्णा thirst
जॄ (जीर्यति) to grow old, to decay
जीवनम् life
ब्राह्मणः brahmin
वित्तम् money
आ-श्रि (आश्रयति) to depend on (+ acc.)
विघ्नः obstacle

2 Translate the following into English:

दुर्जनः परिहर्तव्यो विद्यया भूषितोऽपि सन् ।
मणिनालंकृतः सर्पः किमसौ न भयंकरः ।।

भोगा न भुक्ता ,वयमेव भुक्तास्तपो न तप्तं , वयमेव तप्ताः ।
कालो न यातो, वयमेव यातास्तृष्णा न जीर्णा, वयमेव जीर्णाः ।।

अस्माकमतिथिभ्यः कियानाहारो दीयेत ? यावन्तमाहारमिच्छन्ति तावान् दीयताम् । इयता धनेन भवान् न तुष्यति । एतस्मिन् ह्रदे मयैतावन्ति कमलानि न कदापि दृष्टानि । तव ज्येष्ठो भ्राता त्वद् बलीयान् किन्तु त्वं तस्मात् पटीयान् । अमुष्मै बालाय लघीयांसं भारं यच्छ । द्रढीयसा चेतसा यूयमीश्वरं पूजयेत । सर्वेषां गुणानां विनयः श्रेष्ठः । एष बालानां यविष्ठः किन्तु बहुभ्यो ज्यायोभ्यो बालेभ्यः

स धीमत्तरः। वीरेषु भीमो बलिष्ठः। रोगिनः सेवेध्वम्। शरदि चन्द्रमसो ज्योतिस्तेजस्वि। नृपतिः पटवे मन्त्रिणे न कुप्येत्।

Translate the following into Sanskrit: 3

How many sick people live in this town? As many (तावत्) as (यावत्) there are healthy people. Go to the nearest house. The hero, steadier than a mountain, was carried by a horse faster than the wind. The sage's body was thin owing to hard penance, but his face was bright. The cleverest of all is not the oldest. In a garden bigger than a town, virtuous ministers went by a broad path to a lake adorned by many lotuses. Dejected, tired and tormented with thirst, two learned brahmins who had left (=having left) their house were seen slowly walking along the river's bank. Many obstacles were overcome (crossed). I play with my smaller brothers. Life is sweeter than death, happiness is lighter than misery, friendship is steadier than money.

LESSONS 21 & 22

Vocabulary 1

Pronominal adjectives

अन्यः-अन्या-अन्यद् other

एक one

पर other

कतरः-कतरा-कतरद् which of two

चकृवस् having done

जग्मिवस् having gone

तस्थिवस् having stood

निनीवस् having led

जघ्निवस् having killed

विद्वस् learned (man)

राजन् (राजा) *m.* king

वर्त्मन् (वर्त्म) *n.* path

महिमम् (महिमा) *m.* greatness

गरिमन् (गरिमा) *m.* heaviness

प्रेमन् (प्रेमा, प्रेम) *m.*, *n.* love

मूर्धन् (मूर्धा) *m.* head

आत्मन् (आत्मा) *m.* self
नामन् (नाम) *n.* name
कर्मन् (कर्म) *n.* work
जन्मन् (जन्म) *n.* birth

प्रत्यच् western, averted
न्यच् downward
सम्यच् right, proper
उदच् upward
अन्वच् following

ब्रह्मन् (ब्रह्मा, ब्रह्म) *m.*, *n.* Brahman, the Absolute
व्योमन् (व्योम) *n.* sky
भस्मन् (भस्म) *n.* ashes

विष्वच् pervading
तिर्यच् horizontal
पराच् turned away
प्राच् eastern
अवाच् southern

वेश्मन् (वेश्म) *n.* house
लोमन् (लोम) *n.* hair
चर्मन् (चर्म) *n.* skin, leather
छद्मन् (छद्म) *n.* disguise, fraud

ज्योत्स्ना moonlight
चाण्डालः outcast
विषम् poison
वि-धा to perform, to lay down
वि-रम् (विरमति) to stop, to cease

2 Translate the following into English:

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ।

बहुभिर्मुनिभिरात्मनो महिमा स्तुतः । ब्रह्मणा जगदेतत् सृष्टम् । समीचा वर्त्मना जग्मिवद्भिर्यशोऽधिगम्यते । अग्नेर्भस्मस्वहं मृताया वध्वा हारमविन्दम् । विद्वांस ऋषयः प्रभूतानि शास्त्राणि विहितवन्तः । यावत्त्वं राजा तिष्ठसि तावदस्माकं सर्वेषां सुखं भवेत् । पराक्रमो राज्ञो भूषणम् । एतावतः शत्रूञ् जघ्नुषे विराय राजा दुर्लभे रत्ने अयच्छत् । आ जन्मनो दरिद्रो नरोऽन्येषां पुरतो लज्जया परिभूयते ।

3 Decline the following:

विद्वस् in the masc. sing., मूर्धन् in the plural; अन्वच् in the neuter plural.

4 Translate the following into Sanskrit:

Your face is turned away, your mind is dejected, ashes cover your head, you have even forgotten the names of your friends. From a pure sky the moonlight falls upon the path. Shoes are made of (with) leather. The child has drunk poison: give him (some) medicine. The king and the queen rejoiced at the birth of a talented son. Let the ministers defeat the western enemies by fraud or by force. For the sake of others the honest man bears the heaviness of misery.

LESSON 23

Vocabulary 1

बालिका girl
गायकः singer
गायिका songstress
गौर white
किशोर adolescent
तरुण youthful
सदृश like, similar
तादृश such

व्याघ्रः tiger
व्याघ्री tigress
हरिणः deer
हरिणी hind
हंसी female swan
मयूरः pea-cock
मयूरी pea-hen
कोकिल cuckoo

अजः goat
बलाकः crane
चटकः sparrow
मृन्मय earthern
चिन्मय spiritual
चर्ममय leathern
अम्भस् (अम्भः) *m.* water
देहः body

जरा old age
रोगः disease
अहितम् harmful deed
चित्र surprising, strange
परि-तर्ज् (परितर्जयति) to menace, to threaten
प्र-हृ (प्रहरति) to strike
आ-चर् (आचरति) to perform

क्षमिन् forbearing
दक्ष competent
स्वस्थ sound
इन्द्रियम् sense
प्रत्युद्यमः remedy
भवनम् house

गुणग्राहिन् appreciative
अरुज healthy
यावत्…तावत् while
कीदृश what kind of
आत्मश्रेयस् (आत्मश्रेयः) *n.* supreme good

पुण्यम् merit
सुदुर्लभ very hard to obtain
प्रयत्नः effort
खननम् digging

अनुकूल favourable
क्षयः loss, decline
दूरतः far away
अप्रतिहत unimpaired
सम्-दीप् (संदीप्यते) to burn
कार्य to be done

Give the feminine of the following: 2

धावन् अश्वः। तरुणः गायकः। ज्यायान् बालकः। हतः व्याघ्रः। तादृशः कोकिलः। पीतवान् हरिणः। कियान् हंसः। तस्थिवान् अजः। गौरः किशोरः। गुणग्राही नरः। डीयमानः चटकः। दृष्टः मयूरः। चारुः बलाकः।

3 Change the voice in the following:

जलं मयूरीभिः पीतम् । स्वसा भ्रातॄन् दृष्टवती । भ्राता स्वसारौ रक्षितवान् । हरिणी राज्ञा हता । तरुण्य गायिका गानं गीतवत्यः । व्याघ्र्या रुदितम् । मात्रोक्तम् ।

4 Translate the following into English:

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती रोगाश्च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाम्भो लोकस्तथाप्यहितमाचरतीति चित्रम् ॥

क्षमी दाता गुणग्राही स्वामी पुण्येन लभ्यते ।
अनुकूलः शुचिर्दक्षः कविर्विद्वान् सुदुर्लभः ॥

यावत् स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत् क्षयो नायुषः ।
आत्मश्रेयसि तावदेव, विदुषा कार्यः प्रयत्नो महान्
संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥

LESSON 24

1 Vocabulary

आ-दा to receive
अनु-भू (अनुभवति) to feel, to enjoy
गौतमः Gautama
अरण्यम् forest
स्कन्धः shoulder
नि-धा to put down

विप्रः brahmin
कःचित् / कःअपि a certain, some
यज्ञः sacrifice
क्री to buy
वि-क्री to sell
छागः goat

धूर्त rogue
ततः then
उपायः means
प्रकर्षः excellence
तलम् base, foot
आगमनम् coming
साशंकम् with fear

प्रति-ईक्ष् (प्रतीक्षते) to await
परि-ईक्ष् (परीक्षते) to examine
अभि-धा to address
कुक्कुरः dog
आ-कर्ण् (आकर्णयति) to hear, to listen
निःसंशयम् certainly

Translate the following into English: 2

अस्ति गौतमस्यारण्ये कश्चिद् बाह्मणः। स च यज्ञायान्यस्माद् ग्रामाच्छागं क्रीत्वा स्कन्धे नीतवान्। स गच्छन् धूर्ताभ्यामवलोकितः। ततस्तौ धूर्तौ चिन्तितवन्तौ—"यद्येष छागः केनाप्युपायेन लभ्यते तदा मतिप्रकर्षो भवति" इति। ततस्तौ वृक्षयोस्तले तस्य ब्राह्मणस्यागमनं प्रतीक्ष्य मार्गे स्थितौ। तत्रैकेन धूर्तेन गच्छन् स विप्रोऽभिहितः। "भो ब्राह्मण किं कुक्कुरः स्कन्धेनोह्यते" इति। विप्रेणोक्तम्—"नायं कुक्कुरः किन्तु यज्ञच्छागः" इति। तदनन्तरं द्वितीयेन धूर्तेन तथैवोक्तम्। तदाकर्ण्य बाह्मणश्छागं भूमौ निधाय परीक्ष्य च साशंकमवदत्—"मम छागः किं कुक्कुरो भवेत्" इति। प्रथमेन धूर्तेनोक्तम् "पश्य। मा स्पृश। तीव्रैर्दन्तैस्त्वां दशेत्" इति। भयाद् विप्रे क्षिप्रं गते धूर्तौ सानन्दं छागं हृतवन्तौ।

Translate the following into Sanskrit, using in every sentence either the indeclinable past participle or the locative absolute: 3

I saw the minister and spoke to him. The enemies having conquered, we fled. The enemies having been conquered we sang. The merchant sold two cows and bought one horse. While the guests were arriving all the servants adorned the house. If you are alive, I, too, am alive. After blaming me, my mother consoled me. While your honour was our king, our happiness always increased. We all fell asleep while the teacher spoke. If a lion is stronger than a jackal, you should certainly vanquish your enemy. Dear friends, look at me and have pity on me. When the two black horses have drunk water and eaten grass, the cows should be brought in. As the baby was carried away by the thieves, the mother, overcome by sorrow, fell upon the ground. Although his daughters had fallen into danger, the rogue did not stir from the house.

LESSON 25

1 Vocabulary

समर्थ able	अर्ह् (अर्हति) to deserve	दोष: fault, defect	अनुराग: love
असमर्थ unable	यत् (यतते) to strive	गुणवत् virtuous	संमानय (संमानयति) to esteem, to honour
शक्य capable of being done	युज्यते it is proper	गुणरागिन् lover of virtue	संसद् (संसत्) *f.* assembly
प्रशम: cessation	खिद् (खिद्यते) to be depressed	कलङ्क: spot, mark	उत्सारणम् driving away
प्रशमं नी to check	शक् to be able	व्याधि: *m.* disease	राजवल्लभ: courtier
सारथि: *m.* charioteer	आ-रुह् (आरोहति) to mount, to climb	जातमात्र: hardly born	अतिपुष्टाङ्गयुक्त strongly built
		वा or	

2 Translate the following into English:

दोषमपि गुणवति जने, दृष्ट्वा गुणरागिणो न खिद्यन्ते।
प्रीत्यैव शशिनि पतितं, पश्यति लोक: कलङ्कमपि ।।

यं यं नृपोऽनुरागेण, संमानयति संसदि।
तस्य तस्योत्सारणाय, यतन्ते राजवल्लभा: ।।

जातमात्रं न य: शत्रुं, व्याधिं वा प्रशमं नयेत्।
अतिपुष्टाङ्गयुक्तोऽपि, स पश्चात्तेन हन्यते ।।

नद्यां स्नातुं वयमागता:। यद् वदति मूर्खस्तद् मतिमान् श्रोतुं नेच्छति। त्वयि प्रसन्ने मम किं गुणेन, त्वय्यप्रसन्ने मम किं गुणेन। येषां विद्या नास्ति तेभ्य: कुप्यति गुरु:। एतावद् दु:खं सोढुमसमर्थाऽस्मीत्युक्त्वा नारी विषन्ना भूत्वा वृक्षस्य तल उपाविशत्। पापं परिहर्तव्यमिति मन्यन्ते साधव:। गच्छेत्युक्तं तया।

3 Translate the following into Sanskrit:

On hearing that her husband had arrived, the young wife ran to the door. We should protect those for whom we feel affection. It is proper to salute the master entering the house. Her sweet song could

not be heard. Those who are able to check their senses are like a competent charioteer. Those who begin to dig a well when their house is burning are like men who take a medicine when sickness has led them to death's door. O king, you should forgive (अर्ह् + *inf.*) my offences.

Change the voice in the following: 4

धीमत्या गायिकया गातुमारभ्यताम् । वक्तुर्मुनेर्वचनानि बोद्धुमारभे ।

LESSON 26

Vocabulary 1

पक्षिन् (पक्षी) *m.* bird
सेना army
सैनिकः soldier
सेनापतिः *m.* general
आम्रम् mango
रूप्यम् rupee
आणकः anna
वैद्यः doctor
श्रोत्रियः learned brahmin
दीर्घसूत्रता slowness
प्रभवः origin
मत्तः from me
योजनम् eight miles

दिनम् day
दिवसः day
सप्ताहः week
मासः month
वर्षम् year
शताब्दम् century
ऋणम् debt
ऋणदातृ one who pays his debts
प्र-सद् (प्र-सीदति) to be favourable
भावसमन्वित wise
क्रोशः two miles

सजल having water
द्वयम् pair
त्रयम् group of three
चतुष्टयम् group of four
क्षुधार्त famished
महिला woman
स्व one's own
तन्द्रा sluggishness
भद्रम् welfare
भागवतः devotee
बुधः wise man
वस्तव्य to be dwelt in

भुजगः serpent
भुजगी female serpent
अण्डः egg
बुभुक्षित famished
क्षीण lean, emaciated
निष्करुण pitiless
पुरुषः man
हातव्य to be avoided
भूतिः *f.* prosperity
हृदयम् heart
बुद्धिः *f.* intelligence
इह here; मूल्यम् price
आलस्यम् laziness

2 Translate the following into English:

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥

प्रसीद मम भद्रं ते भव भावगतस्य मे।
त्वयि मे हृदयं देव त्वयि बुद्धिर्मनस्त्वयि ॥

त्यजेत् क्षुधार्ता महिला स्वपुत्रं खादेत् क्षुधार्ता भुजगी स्वमण्डम्।
बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति।

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥

तत्र मित्र न वस्तव्यं यत्र नास्ति चतुष्टयम्।
ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ॥

3 Translate the following into Sanskrit:

(*N.B.*—The **time** and **distance** *during which* an action lasts are put in the **accusative:**

बहून् मासान् for many months; द्वे योजने for sixteen miles.

The **time** and **distance** *within which* an action is done are put in the **instrumental:**

त्रिभिः सप्ताहै within three weeks; एकेन क्रोशेन within two miles.

The **time** *after which* an action is done is put in the *ablative*:

दशभ्यो वर्षेभ्यः after ten years.

The **price** at which a thing is sold or bought is put in the **instrumental:**

षड्भी रूप्यैः क्रीतः bought for six rupees.

On the sixth day of the week I sold fruits for 18 rupees. In the nineteenth century many great men fought and died for the country. While all the children are playing, we are able to write poems. For how many rupees did you buy that horse? After returning from my friend's house I was sick for 2 weeks and 4 days. Within 18 miles, we saw only 5 or 6 houses. Three sisters and four brothers lived happily for

many years. The general told the soldiers to rise and to fight like lions. Do as you are told. There is nothing sweeter than honey, nothing dearer than a friend, nothing lighter than a pure mind. The guests are tired for they have walked three krośas.

Conversation between a fruit-seller and a customer: 4

आम्रम्। आम्रम्
कीदृशं फलं तवास्ति। आम्राणि पश्यानि।
पश्यतु भवान्। तादृशं फलमद्य कुत्र भवता प्राप्तुं शक्यते ?
मूल्यं किं वद।
द्वादशाम्राणि चतुर्भी रूप्यैर्विक्रीयन्ते।
किं वदसि ? चत्वारि रूप्याणि। तावन्मूल्यं दातुमसमर्थोऽस्मि।
साधु। कियद् भवता दातुं शक्यम् ?
एकस्य त्रय आणकाः।
भवान् मां परिहसितुमिच्छति। येन मूल्येनैतानि फलानि मया क्रीतानि तद् भवतो मूल्याद् भूयः।
भवतु। अहं गच्छामि।
तिष्ठतु भवान्। मम वचनं श्रूयताम्। पञ्चाणका दीयन्ताम्।
त्रय आणका इति मयोक्तम्। पञ्चाणका इति त्वयोक्तम्। अलं कहलेन। मया चत्वार आणका दीयन्ते।
साधु। कियन्ति फलानि यच्छामि।
एकं दीयताम्।

Three types of men: 5

प्रारभ्यते न खलु विघ्नभयेन नीचैः,
प्रारभ्य विघ्नविहिता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति॥

मातृ देवो भव
पितृ देवो भव
आचार्य देवो भव

SANSKRIT-ENGLISH GLOSSARY

अ

अग्निः *m.* fire
अग्रम् tip, point
अग्रे in front of (+gen.)
अजः goat
अट् (1) (अटति) to roam
अण्डः egg
अत एव therefore
अतिथिः *m.* guest
अत्र here
अदस् that (*see* n. **70**)
अद्य today
अधम lowest
अधः below (+gen.)
अधुना now
अनन्तरम् after (+abl.)
अनिलः wind
अनु after, along (+acc.)
अनुकूल favourable
अनुरागः love
अन्तरा between (+acc.)
अन्तरेण without (+acc.)
अन्तिक near
अन्तिम last
अन्ध blind
अन्नम् food
अन्यः-अन्या-अन्यत् other
अन्यथा otherwise
अन्वच् (अन्वङ्-अनूची-अन्वक्) following
अपराधः offence
अपि even
अप्रतिहत unimpaired
अभितः near (+acc.)
अभिधेयम् name
अम्बु water
अम्भस् (अम्भः) *n.* water
अरण्यम् forest
अरिः *m.* enemy
अरुज healthy
अर्च् (1) (अर्चति) to worship
अर्थ् (10) (अर्थयते) to request
अर्थः object, riches
अर्ह् (1) (अर्हति) to deserve
अलम् enough (+instr.)
अलिः *m.* bee
अल्प little
अव् (1) (अवति) to protect
अवाच् (०वाङ् ०वाची ०वाक्) southern
अश्रु tear
अश्वः horse
अष्टन् eight (*see* n. **130**)
अष्टम (०मः ०मी ०मम्) eighth
अष्टादशन् eighteen
अष्टादश (०शः ०शी ०शम्) eighteenth
अस् (2) (अस्ति) to be

अस् (4) (अस्यति) to throw;
वि-अस् (व्यस्यति) to scatter
असमर्थ unable
असि: *m.* sword
असीम limitless
असृज् (असृक्) *n.* blood
अस्मद् I (*see* n. **67**)
अहि: *m.* serpent
अहित harmful

आ

आ from, up to (+abl.)
आकाश: sky
आकुल disturbed
आगम: arrival
आगमनम् arrival
आचार: conduct
आचार्य: preceptor
आणक: anna
आत्मन् (आत्मा) *m.* self
आत्मश्रेयस् (आत्मश्रेय:) *n.* supreme good
आदेश: order
आद्य first
आप् (5) to obtain
आपद् (आपत्) *f.* adversity
आम्रम् mango
आयुस् (आयु:) *n.* life
आयुष्मत् (०मान् ०मती ०मत्) long-lived

आरोग्यम् health
आलस्यम् laziness
आशा hope
आशु quick
आश्रम: hermitage
आश्रय: refuge, support
आसनम् seat
आहार: food
आह्लाद: joy

इ

इच्छा wish
इति thus
इदम् this (*see* n. **69**)
इन्दु: *m.* moon
इन्द्रियम् sense
इन्धनम् fuel
इयत् (०यान् ०यती ०यत्) so great, so much
इव like
इष् (6) (इच्छति) to wish
इषु: *m.* arrow
इह here

ई

ईक्ष् (1) (ईक्षते) to see
परि-ईक्ष् (परीक्षते) to examine
प्रति-ईक्ष् (प्रतीक्षते) to expect
ईदृश (०श: ०शी ०शम्) such
ईश्वर: God, master

उ

उच्चैः loudly
उज्झ् (6) (उज्झति) to abandon
उत्तम highest, best
उत्सारणम् driving away
उदच् (०दङ् ०दीची ०दक्) upward
उदधिः *m.* ocean
उदार generous, noble
उद्भिद् (उद्भित्) *m.* plant
उद्यमः effort
उद्यानम् garden
उपरि above (+gen.)
उपानह् (उपानत्) *f.* shoe
उपायः means
उभयतः on both sides (+acc.)
उरस् (उरः) *n.* breast
उरु wide
उष् (1) (ओषति) to burn
उषस् (उषाः) *f.* dawn
उष्ण hot

ऊ

ऊर्जस् (ऊर्जः) *n.* vigour
ऊर्मिः *f.* wave

ऋ

ऋच् (ऋक्) *f.* hymn
ऋणम् debt
ऋणदातृ (०ता ०त्री ०तृ) paying one's debts
ऋते except (+abl.)
ऋत्विज् (ऋत्विक्) *m.* priest
ऋषिः *m.* seer

ए

एक one (*see* n. **126**)
एकदा once upon a time
एकादशन् eleven (*see* n. **130**)
एकादश (०शः ०शी ०शम्) eleventh
एतद् this (*see* n. **67**)
एतावत् (०वान् ०वती ०वत्) so great, so much
एव just, only
एवम् thus

ऐ

ऐरावतः Indra's elephant
ऐश्वर्यम् power, sway

ओ

ओकस् (ओकः) *n.* house
ओघः flood, heap
ओजस् (ओजः) *n.* energy
ओदनः boiled rice
ओष्ठः lip

औ

औषधम् medicine

क

क: who (*see* किम्)
ककुभ् (ककुप्) *f.* direction
कण्ठ: neck
कतर: which of two
कथ् (10) (कथयति) to tell
कथम् how
कथञ्चित् somehow
कदा when
कदापि sometimes; न कदापि never
कनकम् gold
कनिष्ठ youngest
कनीयस् (०यान् ०यसी ०य:) younger
कन्या daughter
कपि: *m.* monkey
कपोत: pigeon
कमलम् lotus
कम्प् (1) (कम्पते) to tremble
कर: hand
करिन् (करी) *m.* elephant
कर्ण् (10) (कर्णयति) (to hear)
आ-कर्ण् (आकर्णयति) to hear, to listen
कर्ण: ear
कर्तृ (कर्ता) *m.* doer, master
कर्मन् (कर्म) *n.* work
कलङ्क: spot
कलह: quarrel
कलि: *m.* quarrel
कल्याणम् welfare
कवि: *m.* poet
काण one-eyed
काक: crow
कान्ति: *f.* beauty
काम: desire
कामदुह् (कामधुक्) granting desires
काय: body
कारणम् cause
कार्य to be done
कार्यम् work, business
काल: time
काव्यम् poem
काश् (1) (काशते) (to shine)
प्र-काश् (प्रकाशते) to shine
किङ्कर: servant
किन्तु but
किम् (क: का किम्) who? what? (*see* n. **113**)
कश्चित् काचित् किञ्चित्
कोऽपि कापि किमपि some, a certain
कियत् (०यान् ०यती ०यत्) how great? how much?
किशोर: (०री) adolescent
कीदृश (०श: ०शी ०शम्) of what kind?
कुक्कुर: dog
कुत: whence?
कुत्र where?
कुप् (4) (कुप्यति) to be angry (+dat.)
कुशल skilful, expert

कुस् (4) (कुस्यति) to embrace
कुसुमम् flower
कूप: well
कृ (8) (करोति) to do, to make
अलम्-कृ (अलंकरोति) to decorate
कृत् (6) (कृन्तति) to cut
कृतज्ञ grateful
कृतज्ञता gratitude
कृते for the sake of (+gen.)
कृत्रिम artificial
कृपण wretched
कृश lean, emaciated
कृष् (1) (कर्षति) to draw
(6) (कृषति) to plough
कृष्ण: Kṛṣṇa
कृष्ण black
कृष्णाय (कृष्णायते) to make black
कॄ (6) (किरति) to scatter
क्लृप् (1) (कल्पते) to be fit, to conduce (+dat.)
केलि: *f.* jest
कोकिल: cuckoo
कोप: anger
कौन्तेय: name of Arjuna
क्रम् (1,4) (क्रामति, क्राम्यति), अति-क्रम् (अतिक्राम्यति) to go beyond, to cross
क्री (9) to buy; वि-क्री to sell
क्रीड् (1) (क्रीडति) to play
क्रीडा game

क्रुध् (4) (क्रुध्यति) to be angry (+dat.)
क्रोध: anger
क्रुश् (1) (क्रोशति) to cry
क्रोश: cry, shout
क्लम् (1,4) (क्लामति, क्लाम्यति) to be tired
क्लिश् (4) (क्लिश्यते) to suffer
क्लेश: pain, trouble
क्व where?
क्षण् (8) to hurt
क्षण: moment
क्षय: decay, loss
क्षम् (1,4) (क्षमते, क्षाम्यति) to endure, to forgive
क्षमिन् (०मी ०मिणी ०मि) forbearing
क्षल् (10) (क्षालयति) to wash
क्षि (1) (क्षयति) to decay
क्षिप् (6) (क्षिपति) to throw
अधि-क्षिप् (अधिक्षिपति) to abuse
नि-क्षिप् (निक्षिपति) to put down
सम्-क्षिप् (संक्षिपति) to shorten, to summarize
क्षिप्र fast, quick
क्षीण wasted, lean
क्षुद्र small, mean
क्षुध् (4) (क्षुध्यति) to be hungry
क्षुध् (क्षुत्) *f.* hunger
क्षुधार्त famished
क्षुभ् (4) (क्षुभ्यति) to be agitated
क्षेत्रम् field

ख

खञ्ज lame
खण्ड् (10) (खण्डयति) to break
खण्ड: piece, section
खन् (1) (खनति) to dig
खननम् digging
खलु indeed, surely
खाद् (1) (खादति) to eat
खिद् (4) (खिद्यते) to be afflicted, depressed
ख्यात known, famous

ग

गङ्गा Ganges
गज: elephant
गण् (10) (गणयति) to count
  अव-गण् (अवगणयति) to despise
गति: *f.* course, gait
गन्तृ (०ता ०त्री ०तृ) goer
गन्ध: odour, perfume
गम् (1) (गच्छति) to go
  अधि-गम् (अधिगच्छति) to obtain
  अव-गम् (अवगच्छति) to know
  आ-गम् (आगच्छति) to come
  उप-गम् (उपगच्छति) to approach
  प्रति-गम् (प्रतिगच्छति) to return
गरिमन् (गरिमा) *m.* heaviness
गानम् song
गायक: singer
गायिका songstress
गाह् (1) (गाहते) to plunge
गिर् (गी:) *f.* voice
गिरि: mountain
गुण: virtue, quality
गुणग्राहिन् (०ही ०हिणी ०हि) appreciative
गुणरागिन् (०गी ०गिणी ०गि) loving virtue
गुणवत् (०वान् ०वती ०वत्) virtuous
गुणिन् (०णी ०णिनी ०णि) virtuous
गुरु heavy, honourable
गुरु: *m.* teacher
गुह् (1) (गूहति) to hide
गुहा cave
गृहम् house
गृहिणी housewife
गै (1) (गायति) to sing
गोपाल: cowherd, Gopāla
गौतम: Gautama
गौर (०र: ०री ०रम्) white, fair
ग्रस् (1) (ग्रसते) to swallow
ग्रह् (9) to seize
ग्राम: village

घ

घट: jar
घुष् (10) (घोषयति) to proclaim
घृतम् ghee
घ्रा (1) (जिघ्रति) to smell

च

च and

चकृवस् (०वान् ०कुषी ०वत्) having done

चक्रम् wheel

चक्षुस् (चक्षुः) *n.* eye

चञ्चुः *f.* beak

चटकः (०का) sparrow

चतुर् four (*see* n. **126**)

चतुर्थ (०थः ०थी ०थम्) fourth

चतुर्दशन् fourteen

चतुर्दश (०शः ०शी ०शम्) fourteenth

चन्द्रः moon

चन्द्रमस् (चन्द्रमाः) *m.* moon

चमूः army

चर् (1) (चरति) to move

अप-चर् (अपचरति) to depart

आ-चर् (आचरति) to perform

चर्मन् (चर्म) *n.* leather

चर्ममय (०मयः ०मयी ०मयम्) leathern

चल् (1) (चलति) to move

चाण्डालः (०ली) outcast

चारु lovely, beautiful

चि (5) to collect, to gather

चित्र surprising

चिन्त् (10) (चिन्तयति) to think

चिन्मय (०मयः ०मयी ०मयम्) spiritual

चिरम् for a long time

चिरात् after a long time

चुर् (10) (चोरयति) to steal

चेतस् (चेतः) *n.* mind

चेष्ट् (1) (चेष्टते) to try

छ

छद् (10) (छादयति) to cover

छद्मन् (छद्म) *n.* disguise, fraud

छागः goat

छाया shade

छिद् (7) to cut

छिद्रम् hole, crack

ज

जगत् *n.* world

जग्मिवस् (०वान् ०मुषी ०वत्) having gone

जघ्निवस् (०वान् ०घ्नुषी ०वत्) having killed

जन् (4) (जायते) to be born

जनः man, person

जनकः father

जननी mother

जन्मन् (जन्म) *n.* birth

जप् (1) (जपति) to mutter

जरा old age

जलम् water

जल्प् (1) (जल्पति) to prattle

जातिः *f.* race, caste

जानु knee

जामातृ (जामाता) *m.* son-in-law

जालम् net
जि (1) (जयति) to conquer
वि-जि (विजयते) to vanquish
परा-जि (पराजयते) to defeat
जिह्वा tongue
जीव् (1) (जीवति) to live
जीवनम् life
जीवितम् life
जेतृ (०ता ०त्री ०तृ) victorious
जॄ (4) (जीर्यति) to grow old
ज्ञा (9) to know
ज्ञानम् knowledge
ज्ञानवत् (०वान् ०वती ०वत्) learned
ज्ञानिन् (०नी ०निनी ०नि) learned
ज्येष्ठ eldest
ज्योतिस् (ज्योतिः) *n.* light
ज्योत्स्ना moonlight
ज्वल् (1) (ज्वलति) to glow

झ

झटिति quickly, at once

ट

टगर squint-eyed
टिप्पणी gloss, comment
टीका commentary

ड

डिम्भः young child
डी (1, 4) (डयते, डीयते) to fly

त

तक्रम् butter-milk
तटः slope, shore
तड् (10) (ताडयति) to beat
तडित् lightning
तण्डुलः uncooked rice
ततः thence, then
तत्र there
तथा so, thus
तद् (सः सा तद्) that (*see* n. **67**)
तदा then
तन् (8) to stretch
तनुः *f.* body
तन्द्रा fatigue, sluggishness
तन्द्रालु sleepy, sluggish
तप् (1) (तपति) to burn
तपस् (तपः) *n.* heat, penance
तपस्विन् (०स्वी) ascetic
तमस् (तमः) *n.* darkness
तरुः *m.* tree
तरुण (०णः ०णी ०णम्) youthful
तर्ज् (10) (तर्जयति-ते) to threaten
परि-तर्ज् (परितर्जयति) to threaten
तलम् base, foot
तस्थिवस् (०वान् ०स्थुषी ०वत्) having stood
तादृश (०शः ०शी ०शम्) such
तारा star
तालु palate

तावत् (॰वान् ॰वती ॰वत्) so great, so much

तिर्यच् (तिर्यङ् तिरश्ची तिर्यक्) horizontal

तीरम् bank

तीव्र sharp, violent

तुद् (6) (तुदति) to strike

तुल् (10) (तोलयति) to weigh

तुष् (4) (तुष्यति) to be pleased

तूष्णीम् silently

तृणम् grass

तृतीय third

तृप् (4) (तृप्यति) to satisfy oneself

तृप्तिः *f.* satisfaction

तृष्णा thirst

तॄ (1) (तरति) to cross

अव-तॄ (अवतरति) to descend

तेजस् (तेजः) *n.* glow, brilliance

तेजस्विन् (॰वी ॰विनी ॰वि) spirited, ardent

त्यज् (1) (त्यजति) to abandon

परि-त्यज् (परित्यजति) to give up, to forsake

त्रयम् group of three

त्रयोदशन् thirteen

त्रयोदश (॰शः ॰शी ॰शम्) thirteenth

त्रि (त्रयः तिस्रः त्रीणि) three (*see* n. **126**)

त्वर् (1) (त्वरते) to hasten

द

दंश् (1) (दशति) to bite

दक्ष competent, skilful

दण्ड् (10) (दण्डयति) to punish

दण्डः stick

दन्तः tooth

दम् (4) (दाम्यति) to tame

दया compassion, mercy

दरिद्र poor

दर्शनम् sight, vision

दशन् ten

दशम (॰मः ॰मी ॰मम्) tenth

दह् (1) (दहति) to burn

अव-दह् (अवदहति) to burn down

दा (1) (यच्छति) to give

आ-दा to receive

प्र-दा to offer

दानम् gift

दातृ (॰ता ॰त्री ॰तृ) giver, generous

दारु wood

दासः servant

दासी maid-servant

दिनम् day

दिव् (4) (दीव्यति) to play

दिवसः day

दिवा by day

दिश् (6) (दिशति) to show

आ-दिश् (आदिशति) to command

उप-दिश् (उपदिशति) to instruct, to advise

दिश् (दिक्) *f.* direction
दीप् (4) (दीप्यते) to shine
  सम्-दीप् (संदीप्यते) to burn, to glow
दीर्घ long
दीर्घसूत्रता slowness
दुःखम् misery
दुर्जनः wicked man
दुर्लभ difficult to get
दुहितृ (दुहिता) *f.* daughter
दूतः messenger
दूर distant
दूरम् far away (+abl.)
दूरात् दूरतः from afar
दृ (6) (द्रियते)
  आ-दृ (आद्रियते) to honour
दृढ firm
दृश् (1) (पश्यति) to see
दॄ (9) to tear, to split
देवः god
देशः country
देहः body
दैवम् fate
दोषः fault
द्युत् (1) (द्योतते) to shine
द्रु (1) (द्रवति) to run, to melt
द्वयम् pair
द्वादशन् twelve
द्वादश (०शः ०शी ०शम्) twelfth
द्वार् (द्वाः) *f.* door
द्वि (द्वौ द्वे द्वे) two (*see* n. **126**)
द्वितीय second
द्विष् (द्विट्) *m.* enemy

ध

धनम् wealth
धनवत् (०वान् ०वती ०वत्) rich
धनिन् (०नी ०निनी ०नि) rich
धनुस् (धनुः) *n.* bow
धर्मः duty, law, virtue
धा (3) to put ; अभि-धा to address ; नि-धा to lay down
धातृ (धाता) *m.* creator
धात्री nurse
धान्यम् grain
धाव् (1) (धावति) to run
  अभि-धाव् (अभिधावति) to attack
धिक् fie on (+acc.)
धीमत् (०मान् ०मती ०मत्) talented, prudent
धीर steadfast
धुर् (धूः) *f.* yoke
धूर्तः rogue
धूलिः *f.* dust
धृ (1) (धरति-ते) to hold
धृ (10) (धारयति) to owe
धेनुः *f.* cow
ध्मा (1) (धमति) to blow
ध्यै (1) (ध्यायति) to meditate

न

न not
नक्तम् at night
नगरम् नगरी city
नद् (1) (नदति) to sound
नदी river
ननान्दृ (ननान्दा) *f.* husband's sister
नप्तृ (नप्ता) *m.* grandson
नम् (1) (नमति) to salute
नमः honour, salutation to (+dat.)
नरः man
नव new
नवन् nine
नवम (०मः ०मी ०मम्) ninth
नवदशन् nineteen
नवदश (०शः ०शी ०शम्) nineteenth
नश् (4) (नश्यति) to perish
नह् (4) (नह्यति) to bind
नामन् (नाम) *n.* name
नाम by name
नारी woman
नाशः destruction
निकषा near (+acc.)
नित्य constant, regular
निद्रा sleep
निधिः *m.* treasure
निन्द् (1) (निन्दति) to blame
निनीवस् (०वान् ०न्युषी ०वत्) having led
निपुण skilled
निरपराध innocent
निर्गुण worthless
निर्दय pitiless
निष्करुण pitiless
निःसंशयम् certainly
नी (1) (नयति) to lead
आ-नी (आनयति) to bring
परि-नी (परिणयति) to marry
नीच low
नीतिः *f.* conduct
नीरुज healthy
नील blue
नृत् (4) (नृत्यति) to dance
नृपः king
नृपतिः *m.* king
नेतृ (नेता) *m.* leader
नेत्रम् eye
न्यच् (न्यङ् नीची न्यक्) low

प

पक्षः side, wing
पक्षिन् (पक्षी) *m.* bird
पङ्कम् mud
पच् (1) (पचति) to cook
पञ्चदश (०शः ०शी० शम्) fifteenth
पञ्चदशन् fifteen
पञ्चन् five (*see* n. **130**)
पञ्चम (०मः ०मी ०मम्) fifth
पटु clever

पठ् (1) (पठति) to read
पत् (1) (पतति) to fall
परि-पत् (परिपतति) to fly around
पत्नी wife
पत्रम् leaf, letter
पथ्य wholesome
पद् (4) (पद्यते) to go
वि-पद् (विपद्यते) to fall into adversity
सम्-पद् (संपद्यते) to prosper
पदम् step, place
पयस् (पयः) *n.* water, milk
पर other
परतः beyond (+abl.)
परशुः *m.* axe
पराक्रमः valour, exploit
पराच् (०राङ् ०राची ०राक्) turned away
परिव्राज् (परिव्राट्) *m.* mendicant
परिषद् (परिषत्) *f.* assembly
परिहर्तव्य to be avoided
परुष hard, rough
पर्वतः mountain
पशुः *m.* beast
पश्चात् behind (+gen.)
पा (1) (पिबति) to drink
पा (2) to protect
पाठः lesson
पाणिः *m.* hand
पात्रम् vessel
पादः foot
पापम् sin
पारिषदः courtier
पाल् (10) (पालयति) to protect
पितृ (पिता) *m.* father
पीड् (10) (पीडयति) to oppress, to torment
पीत yellow
पीन fat
पुण्यम् merit
पुत्रः son
पुनर् (पुनः) again
पुरतः in front (+gen.)
पुर् (पूः) *f.* city
पुरा formerly
पुरुषः man
पुरुषकारः human effort
पुष् (4) (पुष्यति) to nourish
पुष्पम् flower
पुस्तकम् book
पूज् (10) (पूजयति) to worship
पूर्वम् before (+abl.)
पृथिवी earth
पृथु wide
पॄ (3) to fill
प्रच्छ् (6) (पृच्छति) to ask
आ-प्रच्छ् (आपृच्छते) to take leave
प्रति towards (+acc.)
प्रत्यच् (०त्यङ् ०तीची ०त्यक्) backward, western

प्रत्युद्यम: reaction, remedy
प्रथम first
प्रभव: origin
प्रभाव: power
प्रभु: *m.* lord, master
प्रभूत much, many
प्रयत्न: effort
प्रशम: cessation
प्रशमं नी to check
प्रसन्न favourable
प्रसाद: favour
प्राक् before (+abl.)
प्राच् (प्राङ् प्राची प्राक्) forward, eastern
प्रातर् (प्रात:) early
प्रावृष् (प्रावृट्) *f.* monsoon
प्रासाद: palace
प्रिय dear
प्री (10) (प्रीणयति) to please
प्रेमन् (प्रेमा, प्रेम) *m.,n.* love

फ

फट: hood of a snake
फल् (1) (फलति) to bear fruit
फलम् fruit
फलवत् (०वान् ०वती ०वत्) fruitful
फुल्ल blossoming
फेण: foam

ब

बन्ध् (9) to bind
बन्धु: relative, friend
बलम् strength
बलवत् (०वान् ०वती ०वत्) strong
बलाक:-का crane
बलिन् (०ली ०लिनी ०लि) strong
